This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साहित्यशास्त्र
नंबर ८

॥ रसतरंगिणीग्रंथोयंसराजपतु ॥

Acc. No. ~~7060~~ M-1871, Author - भानुदत्त, Subject - ? Xerox - 18.
Title - रसतरङ्गिणी, Date - ? folio - 18

KKSU LIBRARY
RAMTEK
441 106
M-1871
Dist Nagpur

...ocked 2012

श्रीगणेशायनमः॥लक्ष्मीभालोकपलुभ्यन्निगममुपहसन् शोचयन्पङ्कजंतन्नूक्षत्रंशोणासिपरयन्समितिरशमुरवंवीक्ष्यरोमांचमंचम्॥स्वत्वोद्देयं
गवीनंचकितमपसरन्म्लेच्छरक्तैरिंगंतानुसिचंदंतेनभूमिंतिलमिवतुलयन्पातुकःपीतवासाः॥१॥भारत्याःशास्त्रकांतारश्रांतायाःशांतिकारिणी॥
क्रियतेभानुनाभूरिरसारसतरंगिणी॥२॥वाणीकमलिनीभानोरेषारसतरंगिणी॥हंसाकलनधियस्तत्रयुक्तमत्रप्रतीयतां॥३॥गिरांदेविनरंगिण्यांवा
रयक्रूरवारणान्॥पद्धविष्यतिलोकानामाविलोविरलोरसः॥४॥हेतोःपूर्ववृत्तित्वनियमात्ततःपूर्वमेवतस्योपन्यासःसमुचितस्स्यहेतवोभावायस्ते
नतेभ्यःपूर्वंभावास्थयएवनिरूप्यंते॥रसानुकूलोविकारोभावः॥विकारोन्यथाभावः॥विकारश्चद्विविधः॥आंतरःशारीरश्च॥आंतरोपिद्विविधःस्थायि
भावोव्यभिचारिभावश्च॥शारीरास्तुसात्त्विकभावादयः॥यत्तुमनोविकारोभावस्तत्तयातज्जन्यदेहविकारेस्वेदादौभावपदप्रयोगोगौणइति॥नतुल्य
दुभयत्रापिभावपदप्रयोगेणविनियंतुमशक्यत्वात्॥लक्षणानुरोधेनलक्ष्याव्यवस्थितेः॥इतरभावस्यात्मभावलोपनायकत्वेसतिसजातीयविजा
तीयभावानभिभाव्यःप्रथमः॥इतरानभिभाव्योमनोविकारःसकलप्रधानोमनोविकारोवास्थायीभावः॥नचव्यभिचारिणिसात्त्विकभावेवाव्य
भिचारः॥तस्येतरभावस्यात्मभावलोपनायकत्वाभावात्॥चरमसमयपर्यंतस्थायित्वात्स्थायित्वव्यपदेशः॥सचाष्टधा॥रतिर्हासश्चशोकश्चक्रो
धोत्साहोभयंतथा॥जुगुप्साविस्मयश्चेतिस्थायिभावाःप्रकीर्तिताः॥२॥नत्वेष्टवस्तुसमीहाजनितामनोविकृतिरपरिपूर्णारतिः॥साचाल्पचिद्दर्शनेनक्वचि
छ्रवणेनक्वचित्स्मरणेन॥यथा॥चसुंदरुषोवलोनिगदितंपीयूषपाथोधरोभ्रसंज्ञापरिचारिकासमजनिस्फीतंस्मितंरोहदं॥संतापंतरुणार्ककर्कशरुचिंनि
यस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चासवाताहर्तिं स्मादेषसहिष्णुत्वे सरिवस च प्रेमद्रुमः कोमलः॥ कोमलपदार्थपूर्णता॥ कूतूहलकूतवचनवेषवैसादृश्यकृतो मनोविकारः परिमितो हासः
कचनभेदवेषभेदकृतेभयक्रोधेष्वनातिव्याप्तिः॥ तत्रकुतूहलकृतत्वाभावात्॥ यथा जातचरणानां॥ आगच्छन्नगरोपकण्ठमिलितैरंगेष्टितो बालकैः शुंखांते
परिसारिकाभिरचिरं सोल्लासमावेदितः॥ साकूतं सकुतूहलं बलिवधूवृंदे पुरो दापयत्यन्नं किंचिदुदंचितस्मितलवः पायात्सवो वामनः॥१॥ लवपदार्थपूर्णता॥ इ
ष्टविश्लेषजनितो रत्यनालिंगितपरिमितो मनोविकारः शोकः॥ नचेष्टविश्लेषजनितविप्रलंभशृंगारस्य करुणत्वापत्तिः॥ तस्य रत्यालिंगितत्वात्॥
नचरतिः प्रीतिस्तया विना शोकोपि नोत्पद्यते न चासंभवदुक्तिवाच्यं॥ इष्टसमीहाजनितमनोविकृतेः रतेरुक्तत्वात्॥ कुमारसंभवे रत्याः कादंबर्यां महाश्वे
तायाः रघुवंशेऽजस्य प्रलापे करुण एव रसस्तत्र तत्र बाधनिश्चये नेष्टवस्तु समीहाया अभावात्॥ यत्र च मृतस्य जीविताशा तत्र शृंगार एव रसः॥ बाधसंदेह
स्य प्रात्यसंदेहपर्यवसितत्वया समीहाया अप्रतिबंधात्॥ तथा च यूनोरेकतरस्मिन्मृते प्रलापः॥ करुण एव रसः जीवितोः विश्लिष्टयोः प्रलापः शृंगाररसः
अत एव रससरलदीपिकायां करुणरसोदाहरणं॥ अपि जीवितजीवनाथे सा संनिधायोत्थितया तया पुनः॥ रतिरप्युरुषाकृतिं क्षितौ हरकोपानलभ
स्मकेवलं॥१॥ ननु विप्रलंभशृंगारस्य पूर्वानुरागभासमानत्वात्करुणात्मकत्वात् जीवतोरपि विप्रलंभस्य करुणरसत्वमायातमिति चेत्सत्यं तत्र करुणर
सस्यांगत्वेन भासमानत्वात्करुणात्मकव्यपदेशः॥ यथा॥ विरहज्वरमूर्छया यतं नीनयनेनाश्रुजलेन सिच्यमानां॥ समवेक्ष्य रतिं विनिःश्वसंतीं क
रुणाकुञ्चलितावभूव शंभोः॥ कुञ्चलितपदार्थपूर्णता॥ अन्यापकृतः प्रमोदप्रतिकूलः परिमितो मनोविकारः॥ क्रोधः प्रमोदप्रतिकूल इति वि

र० तं गि
२

शेषणाद्धर्षसुखवदुर्वचनावमानितस्य रामस्य वीररसेनातिव्याप्तिः॥ यथा॥ परशुरामवाक्यं॥ नाधाराम्यकरोमि कार्मुकलतां विन्यस्तहस्तांबुजः किंचित्पा
टलमासि लोचनयुगे तावन्निमेषोदयात्॥ यावत्सायककोटिपाटितरिपुक्ष्मापालमौलिस्खलन्मल्लीमाल्यपतत्सरागपटलैर्नामोदिनी मेदिनी॥१॥
किंचित्पाटलपदार्थपूर्णता॥ शौर्यदानदयान्यतमप्रकृतः परिमितो मनोविकार उत्साहः॥ वीरस्तु युद्धदानदयावीरभेदात् त्रिधा युद्धवीरस्योत्साहो यथा॥
सेनां संघट्टयन्स्तुति द्विगुणयन्नूत्नापं चमत्कारयन् नेत्रस्याभिमुखो भविष्यति जगद्विद्रावणो रावणः॥ इत्युत्साहविचारमूढहृदयो देवो रघूणां
पतिर्न्यासविन्यासविधिं विनैव विशिखं बाणासने न्यस्तवान्॥१॥ अत्र विचारपदार्थपूर्णता॥ दानवीरस्योत्साहो यथा॥ आरोप्य शशांकमंडमिंदुं
हर्म्याय हेमाचलं दीपाय द्युमणिं मही मिव कथं नो भिक्षवे दत्तवान्॥ दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्रांबुजो जानीमो भृगुनंदनस्तदखि
य लं न प्रीतो दृष्टवान्॥१॥ पल्लवितं न फलितमित्यपूर्णता॥ दयावीरोत्साहो यथा॥ दुस्तारसंसारपयोधिपारं प्रकारमालोकयतो जनानां॥ समु
त्थितो वक्षसि कैटभारेः कृपांकुरः कौस्तुभकैतवेन॥ अंकुरपदार्थपूर्णता॥ अपराधविकृतरवविकृतसत्वादिजनितो परिपूर्णो मनोविकारो भयं
यथा॥ तार्क्ष्यपक्षपवनोपसेवितं वीक्ष्य पीतवसनं रथांगपुरः॥ भीतभीत इव तत्र कालियो मंदमंदमुपसर्तुमुद्यतः॥ इवोपन्यासोपूर्णता॥ अस्पृ
श्यदर्शनस्पर्शनस्मरणजनितामनोविकृतिरपरिपूर्णा जुगुप्सा॥ यथा॥ शार्दूलशावकचवच्चटपाट्यमानसारंगसंगवतिभग्नतिरामचंद्रः॥ बी
भत्सकारवनभारतथा जुगुप्सां दुःखेषु दुःखमतिरेव नदर्शितानां॥१॥ ननुयेति पदार्थपूर्णता॥ चमत्कारदर्शनस्पर्शनस्मरणजनितो परि

राम०
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णो मनोविकारो विस्मयः ॥ यथा ॥ युध्यंतमर्जुनं वीक्ष्य केवाद्देवान विस्मिता ॥ न मेने बहु गोविंदो हृष्ट्वा कर्णपराक्रमः ॥ न मेने वह्निलिपराद्दपूर्णता ॥ शृंगाराद्दे
चमत्कारदर्शनाद्यत्र मनोविह्वलितं गतमाभासते तत्र शृंगार एव रसः ॥ यत्र प्राधान्येनाभासते तत्राद्भुत एव रसः ॥ अंगतया यथा ॥ वैशम्यं श्रुतिपंकजात्मकस्यत्य
नं स्त्रीरंदशोः स्वर्णालंकरणाच्च नक्तिं पुलकोवैधर्म्यमंगश्रियः ॥ तस्यानुपुरस्य परागमहसः पाहारविंदश्रियो भेदं सिंजितमेव वक्ति किमतः शिल्पविधेर्वर्ण्यतां
प्राधान्येन यथा ॥ विनायायं कोयं समुदस्यति सौरभ्यसुभगः किरंत्योराम छामधिधरणितारापरिवढः ॥ धनुर्धं तस्मा रतिरयति विहारं मम सा निरातंकः पंके
रुहयुगलमंकेन दयति ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां स्थायिभावनिरूपणो नाम प्रथमस्तरंगः ॥ अथ विभावानिरूप्यंते ॥ विशेषेणभावयंति
उत्पादयंतीति विभावाः ते च द्विविधाः ॥ आलंबनविभाव उद्दीपनविभावाश्चेति ॥ यमालंब्य रसः प्रवर्तते स आलंबनविभावः ॥ यो रसमुद्दीपयति स उद्दीपनविभावः ॥
तत्रालंबनविभावो यथा ॥ प्राणस्य प्रतिमूर्तिः प्रसन्ना पुण्यकलिकायाः ॥ अधिदैवतं नयनयोः सा मम मया कापि सा सेव ॥ शृंगारस्योद्दीपनविभावाः ॥ तत्र भरतः
ज ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः ॥ उपवनगमनविहारैः शृंगाररसः समुद्भवति ॥ चंद्रनारस्य उद्दीपनीयाः ॥ यथा ॥ संध्याशोणांबरजवनिका कामिनी
प्रेनात्यं नांदीभ्राम्यद्भ्रमरविरुतं मारिषः कोपि कालः ॥ ताराः पुष्पांजलिमिव किरन्नस्य पुष्पकेतोर्नृत्यारंभं प्रविशति सुधादीधितिः सूत्रधारः ॥ हास्यविभावाः ॥
तत्र भरतः ॥ विपरीतालंकारैर्विकृताचाराभिधानवेषैश्च ॥ विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः ॥ अंगविकृतिरस्य उद्दीपनीयः ॥ यथा ॥ केयूरं घर्घरयन् स्य
भ्रमयन्मौलिं विवर्तयन्बाहून् ॥ नेत्रांचलं चलयन्नृत्यति मायाशिशुच्छाया ॥ करुणस्य विभावास्तत्र भरतः ॥ इष्टजनस्य विनाशाच्छापात्क्लेशाद्बंधनाच्चासना
त् ॥ अस्मादर्थविशेषात्करुणरसाख्यः समुद्भवति ॥ बंधरास्य उद्दीपनीयाः ॥ यथा ॥ त्वां पश्यतो भुजगपाशनिबद्धदेहमद्यापि मय्य हंसवीन बाहुः प्रयाति ॥ ने

र० त० गी०
॥३॥

त्रे निमिल्य सि पश्यसि नेयतावदा संमरीयामितिलक्ष्मणयुक्तमेव ॥ रौद्रस्य विभावाः ॥ तत्र भरतः ॥ आयुधखड्गाभिभवाद्विकृतभेदाद्विदारणाच्चैव ॥ संग्रामसंभ्रमाद्
र्थाद्देस्य संजायते रौद्रः ॥ वैरिदर्शननिर्भर्त्सनादय उद्दीपनीयाः ॥ तत्त्वं तीनिमिरद्युतिकृतवक्षिप्रत्यर्थिचक्रव्यथामेघोमार्गणवतावकौ विजययोनिस्त्रिंशधारानिशा ॥ बुद्धेकुं
श्यविपक्षपक्षविद्कुंभीद्रकुंभस्थलभ्रश्यन्मौक्तिककैतवेन भवरितः तारावलीवर्षति ॥ वीरस्य विभावाः ॥ तत्र भरतः ॥ उत्साहाध्यवसायादविषादित्वादविस्म
यान्मोहात् ॥ विविधादर्थविशेषाद्वीररसो नाम संभवति ॥ विनयबलसाहस्य उद्दीपनीयाः ॥ युद्धवीरविभावो यथा ॥ लंकाधिपः संप्रति शंकनीयो जभारिभापहथा
दुर्वीर्यः ॥ इत्यालपंतं हनुमंतमेष रामः स्मितेन स्मरत्यांचकार ॥ दानवीरविभावो यथा ॥ वपुषा विनयं वहति केचिदूहच साकेपि चरंति चारुचर्या ॥ अतिथौ समुपागते स
पर्यापुलकैः पल्लवयंति केपि संतः ॥ दयावीरविभावो यथा ॥ कुसुमविरलमग्रदंतिभाजो निशायां लमसिंदूरयगा हे प्राणिनो वीक्षणीयाः ॥ स्मृतिकिमु समुद्
द्दीपलेखाभिरामद्युतिसुरसिमुरारेः कौस्तुभं संबभार ॥ ननु स्वनिष्ठोत्साहः कथमुद्दीपनविभाव इति चेत् सत्यं ॥ उद्दीपनविभावो नाम मनागवगमकः स्वस्व
निष्ठपरनिष्ठो वेति न विशेषः ॥ अनुभावस्तु स्वनिष्ठ एव गमकः ॥ तस्यानुमापकत्वेन पक्षे वृत्तित्वनियमादिति ॥ ननु दयावीरः करुण एव कथं नांतर्भवति निरूपा
धिपरदुःखप्रहाणेच्छा स्यात्सा च करुणया विना न संभवतीति चेत् ॥ करुणस्य स्थायिभावः शोकः दयावीरस्य स्थायिभाव उत्साह इति स्थायिभावभेदेन भेदात् ॥ न
नु दयावीरे करुणरसप्रतीतेः का गतिरिति चेत् सत्यं ॥ करुणया विना दयावीरस्यानुभवात्तत्र करुणाया अनुभावकत्वादिति ॥ भयानकस्य विभावाः ॥ तत्र भरतः ॥ राम
विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ॥ गुरुनृपयोरपराधात्कृतकः संभवानको ज्ञेयः ॥ बंधुवधबंधनश्रवणश्मशानदर्शनादय उद्दीपनीयाः ॥ यथा ॥ उद्यल्लंका ३
तिकठोरकेसरदलत्पाथोधरप्रस्खलद्विद्युद्दीधितिकाचनिहृतजगन्निद्रोपमः सीधरः ॥ स्फूर्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजः प्रोदाशीर्वच नम्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्षितवालिर्व्यालोकिमायाहरिः ॥ वीभत्सस्य विभावाः ॥ तत्र भरतः ॥ अनभिमतदर्शनगंधरसस्पर्शदोषैश्च ॥ उद्वेजनैश्च बहुभिर्वीभत्सरसः समुद्भवति ॥ इत्यु
क्तलक्षणश्रवणस्मरणादय उद्दीप्याः ॥ यथा योधानामथ रेरशोककुसुमैर्नेत्रैरसितैरंबुजैर्दंतैः कुंदरदलैः करैः सरसिजैः संपाद्य पुष्पांजलिं ॥ स्त्रिश्रीकर्णयुगं विधायकरिणां
रक्तावसिक्तांगकैः प्रेतानां वदुंभिः उरामुरभिर्देहैन्यस समारभ्यते ॥ अद्भुतस्य विभावाः ॥ तत्र भरतः ॥ यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्म रूपं च ॥ तत्सर्वं द्रष्टव्यं रसोद्भूतो
नाम संभवति ॥ मायेंद्रजालादय उद्दीप्याः ॥ यथा ॥ उद्दामोद्दाममाद्यप्रतिभटदलनोद्यज्जागृतभावः सोयं देवो मुकुंदो भवतु नरहरिस्तारितारातिविम्बः ॥ यस्य क्रोधप्रतो
पोद्भटसटाकोटिभिः पाटितौ मंत्राण्यंभोधराणां बहिरिव निरयुर्विद्युतां केतवेन ॥ इंद्रजालं यथा ॥ आम्निप्रांगणसीम्नि सांध्यकिरणं विस्तार्य चेलांचलं ध्याते कामरणपं
सुभिः त्रिजगती नेत्राणि संमोहयन् ॥ ताराशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छन्ननासिंच्छिद्रतस्य वहिः करोति वहनास संवासु गोमायिकः ॥ इति श्रीभानुदत्तमिश्रविरचिता
यां रसतरंगिण्यां विभावनिरूपणं नाम द्वितीयस्तरंगः ॥ अथानुभावा निरूप्यंते ॥ ये रसाननुभावयंत्यनुभवगोचरतां नयंति तेनुभावाः कटाक्षादयः ॥ करणत्वेन चा
नुभावकता ॥ करणत्वं च फलायोगव्यवच्छिन्नकारणत्वं ॥ नैसैव कथमनुभावकापेक्षेति चेत् ॥ यतः स्थायिभावः परिपूर्णो रसः तस्य चांतरत्वात्परफलेन विना कथं त्वा
नमित्यनुभावकस्यापेक्षणीयत्वात् ॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति ॥ दृष्टे कटाक्षादौ हि कामिनीमनोविकारः परिपूर्णो भवति ॥ अनुभवसिद्ध
त्वेनापह्नोतुमशक्यत्वात् ॥ किंच प्राचीनसंमतिरपि ॥ इषदंकितपक्ष्मपंक्तिभिरनाकूतस्मितैर्वीक्षितैः रंगैः खलवाघसुंदरिकस्कोज्जगद्धूर्तिते ॥ अंतः पांसुलहेम
केतकदलद्रोणीदुरापश्रियो रोमस्य विभावनादिह पुनः कूरेकिमाकांक्षसि ॥ इति चेत् ॥ सत्यं कटाक्षादीनां करणत्वेनानुभावकत्वं विषयत्वेनोद्दीपनवि
भावत्वं तथा च नायिकानिरसानुभावकरणत्वेन नायिकांप्रति कटाक्षादयोनुभावा अपि ते चक्षुर्गोचरीभूताः कामिनोर्मनोविकारं कारयंतो विषयत्वेनो

र०त०
५

द्दीपनविभावा इति ॥ स चानुभावः कायिकमानसाहार्यसात्विकभेदाच्चतुर्धा ॥ कायिकाः भुजाक्षेपादयः मानसाः प्रमोदादयः नाट्यं चतुर्भुजलक्षणमाहार्यं ॥
सात्विका रोमांचादयः ॥ शृंगारस्यानुभावाः ॥ तत्र भरतः ॥ नयनवदनप्रसादैः स्मितमधुरवचः प्रमोदैश्च ॥ विविधैरंगविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥
कटाक्षभुजाक्षेपादय उद्दीप्याः यथा ॥ मुक्ताहारस्तनकलशयोः कर्णयोः कर्णिकारमालीमालापरिभवभयाद्दूर एवैन्यवारि ॥ दृष्टेभीष्टे समजनि पुनः सुभ्रु
वो भूषणाय श्रान्तवालोलरोलकमलद्रोहस्तूः कटाक्षः ॥ हास्यस्यानुभावाः ॥ तत्र भरतः ॥ विकृताकारैर्वाक्यैरंगविकारैश्च विकृतवेषैश्च ॥ हास्यं जनयति यस्मा
त्तस्माज्ज्ञेयो रसो हास्यः ॥ आस्याधरविवरणकपोलस्पंदद्दृष्ट्याकुंचनादय उद्दीप्याः ॥ यथा पात्रीहस्तकपालमंडलमिरपीयूषभानोः कलां वार्तां हि त्वफणा
मणिं फणिपतेः संपाद्य तस्मिन् शिरस्त्रां सायं दीपविधिं वितन्वति शिशौ मंदं हसंत्योत्तया ॥ किंचित्कुंचदपांगभंगकुटिला दृष्टिः समारोपिता ॥ करुणस्यानुभावाः
तत्र भरतः ॥ अश्रुस्नेहरुदितैर्मोहैः प्रलापपरिदेवनप्रलयैः ॥ अभिनेयः करुणरसो देहायासाभिघातैश्च ॥ मुखशोषणवैवर्ण्यादय उद्दीप्याः ॥ यथा ॥ जाते निर्गच्छति
गणपतौ नाकमध्यापितस्यान्वाचां देव्यास्तस्य जातिशिथिलं कंकणं नैव हेतोः ॥ अद्राप्यार्द्रीभवति कुचयोर्नापि मादीरपंकोनेत्रैर्निर्यत्पयसि न पुनः कज्जलं संसर्
मेति ॥ रौद्रस्यानुभावाः तत्र भरतः ॥ नानाप्रहरणसंकुलशिरः प्रकंपैः करग्रहनिष्पेषैः ॥ घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः ॥ भ्रुकुटिदंतोष्ठपीडनाद
य उद्दीप्याः ॥ यथा ॥ ये ये भीमेन भ्रुकुटिघनरवं दंतनिष्पीडितोष्ठं नित्तिसाक्यान्निविंध्यावलनदुलत्पमलक्रमभाजः करींद्राः ॥ तेषामेषां कपोलहिवभ
यविधुताकांचिदुड्डीयमानाविवेपीयूषभानोर्मधुकरपटलीलांछनस्य छलेन ॥ वीरस्यानुभावाः ॥ तत्र भरतः ॥ धैर्येण शौर्येण वीर्येणोत्साहपराक्रमप्रभावैश्च ॥ वा

र.त.
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीरासेपकृते वीररसः सम्यगभिनेयः॥ नन्ववीरस्य रसस्य आ प्रकारशरीरधर्माभावितुमर्हति नित एव सर्वत्रोक्ता॥ तत्र आच धैर्योत्साहो न शरीरधर्मा धैर्यपदेन
चाकल्याभौ उत्साहपदेन चाम्बु पुलकादयो लक्षिताः॥ युद्धानुभावश्चतुर्विधः तत्र मानसोप्यनुभवकः॥ सच ज्ञायमान एवगमकः सच मानसैरैंद्रियकश्चे
तिनकश्चिद्विशेषः॥ विजयबलं स्पष्टुहनीया॥ युद्धवीरानुभावोयथा॥ अये वासवजिसमग्रसमरव्यापारहीनागुरुः पार्श्वेतस्कविपक्षपक्षस्तनोक्रीडाधनो
रावणः॥ स्तुंभलयति सर्वतः परिजनेसंध्यास्पलिकुर्वते श्रीरामस्य नकुंभकस्य पदवेस्पुछास्फोपिक्रमः॥ दयावीरानुभावोयथा॥ ओहास्य नृविधेहि गछ
नगहात्संवीक्ष्य मद्भ्राजनं याचकं किंतु भवंतमेतरस्विकिकोसक्षम्यतां॥ दानस्त्रेदहमस्मिचेद्धुमती सर्वैवसागरस्य नांवर्णे चेहुरुहस्विणाधनपतेरानीयसं
पायते॥ दयावीरानुभावोयथा॥ ध्वांतस्तोमधरे जगद्दयकरे पाथोधरे वर्षति क्रोशद्व्याकुलवत्सगोकुलदयारीनेक्षणः केशवः॥ हस्तन्यस्तमहीधरश्चुतिभया
न्नेवांगुलीपल्लवैः स्रस्तं वेणुमुरीकरोति नतनोः स्रस्तहरत्वंमुकं॥ भयानकस्यानुभावाः तत्र भरतः॥ करचरणनेत्रमस्तकसर्वांगानांभकंपनैश्चैव॥ शुष्क
मुखतालुकंठैर्भयानको नित्यमभिनेयः॥ रोमांचवदनवैवर्ण्यस्वेदा स्पष्टुहनीया॥ यथा ग्रस्तन्यस्तलणावलीढवदनव्याकीर्णफेनोच्चयं काकुव्याकुलघोरघर्घ
रखस्फारीभवल्लोचनं॥ कंपप्रस्खलदंघ्रिनामनतनुश्वासोर्मिनुन्नाधरं वीक्षीर्णेभुजगस्यवक्रकुहरे हस्यगावस्थिताः॥ बीभत्सस्यानुभावाः तत्र
भरतः॥ आननेत्रविघूर्णनलोचननासाविधानेश्च॥ अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः सर्वांगसंहारनिष्ठीवनाद्यस्पष्टुहनीया॥ यथा॥ कृपदहरेमुख
कुहरे विध्यते संवीक्ष्य दिनकरं लक्ष्मीः॥ हलहेतयपललकवलभ्रांतामुखमंभुके परिधे॥ अद्भुतस्यानुभावाः तत्र भरतः॥ स्पर्शग्रहणोल्लासे हाहाकारैश्च
साधुवादैश्च॥ वेपथुगद्गदवचनस्वरभेदैस्तथैव नयनस्य निर्निमेषप्रेक्षणरोमांचाद्यस्पष्टुहनीया॥ यथा॥ पांडवीक्ष्य दोर्दंडखंडितारातिमंडले॥ अद्या

१० त
५

पिनाकिनां नेत्रे निमिषानैव जागृति॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां अनुभावनिरूपणं नाम तृतीयस्तरंगः॥ ३॥ अथ सात्त्विका निरूप्यं धा
ते॥ तत्र भरतः॥ स्तंभस्वेदोथ रोमांचः स्वरभंगोथवेपथुः॥ वैवर्ण्यमश्रु प्रलयइत्यष्टौ सात्त्विका मताः॥ ननु स्य सात्त्विकत्वं कथं व्यभिचारित्वं न कुतः सकलरससा
धारण्यादिति चेत्॥ अत्र केचित् सत्त्वं नाम परकीयदुःखभावनायामत्यंतमनुकूलत्वं तेन कृताः॥ सात्त्विका इति व्यभिचारित्वमनाद्यसात्त्विकव्यपदेश इति॥ नन्न॥
निर्वेदस्मृतिधृतिप्रभृतीनामपि सात्त्विकत्वव्यपदेशापत्तेः॥ नच परदुःखभावनायामश्रुवैवर्ण्यादेरनुकूलत्वार्थः॥ अतएव सात्त्विकत्वमप्येषामिति वाच्यं
निर्वेदादेरपि परदुःखभावनायामप्युपपत्तेरिति॥ अत्रे दूषयतिमाति॥ सत्त्वं नाम स्यप्राणिवाचकत्वात् सत्त्वं जीवशरीरं तस्य धर्माः सात्त्विकाः॥ इत्थं च शारीराभावाः
स्तंभादयः॥ सात्त्विका भावा अभिधीयंते॥ स्थायिनो व्यभिचारिणश्चेति॥ भावाज्ञानरत्ननशरीरधर्माइति॥ शरीरधर्मत्वे सति गतिनिरोधस्तंभः नच
निद्रापराधादावतिव्याप्तिः॥ शरीरधर्मइतिपदेन तेषां वारणात्॥ प्रलयभावीतु चेष्टानिरोधो नगतिनिरोधः अस्य विभावाः॥ हर्षरागभयदुःखविषादवि
स्मयक्रोधाः॥ यथा॥ श्रोणीपीनतरा तनुः कृशतरा भूमीधराडंबरा वक्षोजस्पतथीकृतो निजकुचीमतर्मेयागम्यतां॥ इत्युद्भाव्यकरंदवकंजनिकटे विश्रम्य मं
दस्मितं विगौ हंसमुरीश्वपक्ष्मल दृशा स्तंभस्तिरोधीयते॥ वपुषि सलिलोद्गमः स्वेदः॥ अस्य विभावाः॥ मनस्तापहर्षलज्जाक्रोधभयश्रमपीडाघातम
र्दोस्य॥ यथा॥ कांतेन वकुचशांते राजंते स्वेदबिंदवः॥ हस्यतामदनेनेवक्तामौक्तिकवृष्टयः॥ विकारसमुत्थरोमांचः॥ अस्य विभावाः॥ शीतालिं
गनहर्षक्रोधाः॥ यथा॥ बकुलेषु कुलकोशरोषनिर्यन्मधुकरकूजितभाजिकुंभभृंगौ॥ पुलकयति कपोलपालिमालिस्मितसुभगः कथमद्य नें राम ५
दसूनुः॥ गद्गदत्वप्रयोजकीभूतस्वरभाववैलक्षण्यं स्वरभंगः अस्य विभावाः॥ क्रोधभयहर्षमदाः॥ यथा व्यक्तिस्यास्वरभंगस्य कोपाद्युक्तिः त्रियेलवे

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिपशुः परोराधा मौनं धारयति निष्ठति ।।भावत्वे सति शरीरस्यंदो वेपथुः भावत्वे सतीति विशेषणासत्त्वकसंहारो नातिव्याप्तिः ।। शरीरपरं चेष्टाश्रय
मात्रपरं तेन शरीरावयवकंपेनातिव्याप्तिः ।।अस्य विभावाः ।। आलिंगनहर्षभीत्यादयः ।। कथय कथय मुरोजरामहेलोर्यदुपतिरेष विनोति वेपकानि भवति
करतलेषु रस्य कंपः प्रियसखि स्मृतिरिव मत्सपत्नी ।। विकारभववर्णान्यथाभावो वैवर्ण्यं ।। अस्य विभावाः ।। मोहभयक्रोधशीलतापश्रमाः ।। कु
कुदे कुर्वति काएण माननं स्फिष्ट्योस्तयोः ।। दिवाकरकराक्रांतशशिकांतिमिवादधौ ।। विकारजनितमक्षिसलिलमश्रु ।। अस्य विभावाः ।। हर्षामर्षधूम
भयशोकजृंभाशीतनिर्निमेषप्रेक्षणानि ।। यथा ।। विसृज विसृज त्विन्नदुःखधारामयमुपकंठमुपागतो मुरारिः ।। इति कथयितुमभ्युद्गतस्यानिपतति
री६ वक्षसि पक्ष्मलायताक्ष्याः ।। शारीरत्वे सति चेष्टानिरोधः प्रलयः ।। शारीरत्वे सतीति विशेषणान्निद्रादौ नातिव्याप्तिः ।। स्तंभस्य शरीरधर्मास्तथा साहवैर्यकथनेन
प्रलयोपि शरीरधर्म एव तेनात्र चेष्टापदेन शरीरावयवचेष्टैवाभिमता ।। मनसस्तु कर्म भवति न तु चेष्टा अत एव चेष्टाश्रयः शरीरमिति शास्त्रेस्वयं लक्षणं ।। अस्य वि
भावाः ।। रागोत्कंठ्यादयः ।। यथा ।। नो वक्त्रं नमितं धुतं न च शिरो व्यापारितं नो वपुः वासो न श्लथमास्तृतं निगदितं नो वा निषेधाक्षरं ।। शोणं नापि विलोचनं विरचितं
क्रीडाकलाकातरं चेत केवल मण्विने मधुरिपो व्यापारितं राधया ।। जृंभा च ।। न रसः सात्त्विको भाव इति प्रतिभाति ।। यथा ।। कुर्जृंभानमुल्लसत्कुचयुगं स्विद्यत्क
लस्खलत्कंचुकसस्मगलद्दुकूलमुरयं नाभिभ्रमदूलसत् ।। बालाग्राग्गुलिबद्धबाहुपरिधिं न्यंचद्धिवृत्तत्रिकं उद्यत्कंचुकसंधिदर्शितसहामेलमुज्जृंभते ।। शृंगारलि
सो लकारो च सात्विकभाव समानाधिकरण्य दर्शनान्नु ।। ननु सात्विकभावो वानुभावो वेति विनिगमकाभाव इति चेन्न ।। सत्यं ।। अनुभावत्वे सति सात्विकभावत्वं ल
बाधकाभावात् ।। पुलकादौ तथादृष्टत्वात् ।। न चांगादौ श्चिनेत्रमर्दनादीनामपि भावत्वापत्तिः ।। तेषां भावलक्षणाभावात् सानुकूलो विकारो भाव इति तल्लक्षणं

रसतरंगिणी०
।।६।।

अंगाकृष्ट्यादयो हि न विकाराः किंतु शरीरचेष्टा प्रत्यक्षसिद्धमेतत् ।। अंगाक्रुष्टिरसि मर्दनं पौरुषैरिंछयाविधीयते परिलक्ष्यते जृंभा च ।। विकारादेव भवति
तन्निवर्तौ निवर्तने यथा ।। आधायमानं रहसि स्थितायाः संभाव्य जृंभामचलात्मजायाः ।। चुम्बन्निस्मेरमुखो महेशः करांगुलीभिः कलयांचकार ।। इति
श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां सात्विकभावनिरूपणं नाम चतुर्थस्तरंगः ।। अथ व्यभिचारिभावा निरूप्यंते ।। तत्र भरतः ।। निर्वेदग्लानि
शंकाख्या तथासूयामदश्रमाः ।। आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः ।। व्रीडा चपलता हर्ष आवेगो जडता तथा ।। गर्वो विषाद औत्सुक्यं निद्रापस्मा
र एव च ।। सुप्तिर्विबोधोमर्षश्चाप्यवहित्थमथोग्रता ।। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।। त्रयस्त्रिं
शत्समीप्रममसमाख्यातास्तु नामतः ।। इत्युक्तातो रसेषु संचारित्वमनेकरसनिष्ठत्वमनेकरसव्याप्यत्वं वा व्यभिचारित्वं ।। न च रोमांचादावतिव्याप्तिः ।। तेषा
मपि संग्राह्यत्वात् ।। ते च भावाः शारीराव्यभिचारिणः ।। एते चांतरा व्यभिचारिण इती यांस्तु विशेषः ।। ननु निर्वेदादेरुद्धायित्वं व्यभिचारित्वं च कथमिति चेन्न ।। रसप
र्यंतस्थायित्वमितरत्तोगामित्वं चेत्युपाधिभेदमादायोभयसंभवात् ।। स्वावमाननं निर्वेदः ।। संसारे हेयताबुद्धिर्वा ।। तत्र विभावाः तत्त्वज्ञानापदीर्ष्यादयः
अनुभावाः स्वेदप्रकाशचिंताश्रुपातादयः ।। यथा ।। क्षोणीपर्यटनं श्रमाय विहितं वाराय विद्यार्जिता मानध्वंसनहेतवे परिचिता स्तेते धराधीश्वराः ।। वि
श्लेषाय सरोजसुंदरदृशामायेकुलाद्दृश्यः कुज्ञानेन मया प्रयागनगरे नाराधि नारायणः ।। ग्लानिर्बलनाशः सह तावत्तस्य विभावाः ।। रत्यायासक्षु
त इत्यादयः ।। अनुभावा वैवर्ण्यशैथिल्यदृग्भ्रमणादयः ।। यथा ।। व्याहर्तुं पुनरीक्षणाय न गिरः कंठाद्बहिर्निःसृताः शेषाश्लेषविधिं विधातुमपि वा नेवोल
तारोलैता ।। प्रातस्तल्पमपास्य गच्छति हरौ चंडांशुचंडातपक्लिष्टश्लिष्टकुरंगभंगुरदृशः तस्याः स्थिताद्दृश्यः ।। उत्कटकोरिकानिष्टप्राप्तिसाधनमिष्टहानिवि

राम०
।।६।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चारो वाशंका ॥ तच्च दुर्नयपरक्रौर्यादय विभावाः ॥ अनुभावाः ॥ कंपक्रियाप्रघादनादयः ॥ यथा ॥ एते चित्तविलोचनागुरुजनाज्जिह्वाग्रदोषाः खलाः पो
षाः क्रूरवचप्रपंचसुहसः श्वश्रूश्चर्वसुश्रवाः ॥ किंस्यादिह मनर्थबीजमसकृत्त्वंचिंतयक्षोरुहि स्फूर्जत्किंशुकरामवामनयना निश्वस्य विन्यस्यति ॥ परो
त्कर्षासहिष्णुता परानिष्टचिकीर्षा वासूया ॥ तत्र विभावाः मन्युदौर्जन्यादयः अनुभावाः क्रोपचेष्टादोषोद्भावनादयः ॥ यथा ॥ हरशिरसि सिमयाप्य लभ्य वासे
निवसति कापि कलातुषारभानोः ॥ इति लिखति विधुं तु दस्य मूर्तिं प्रतिभवनं प्रतिभूधरं भवानी ॥ हर्षोत्कर्षो मदः दुःखासंभिन्नसुखानुभवउत्कर्षः ॥ तत्र
विभावः पानं ॥ अनुभावः उत्तमानां निद्रा मध्यमानां हसितमधमानां रोदनं ॥ इंद्रियमोहरूपात्र निद्रा ॥ तस्मादिंद्रियसंमोहेन नयनघूर्णनसांम्येन निद्रेव नि
द्रा ॥ नच हर्षव्यभिचारिभावे तिव्याप्तिः ॥ तत्र हर्षमात्रस्य सत्त्वात्तु तत्रोत्कर्षो जातिविशेषः ॥ किंच तत्र मनसो मोहो त्र च मनसः प्रसाद इति स्वरूपभेदात् ॥ तत्र निद्रा
रोदनादयोत्र च पुलकादयो नुभावाइत्यनुभावभेदाच्च ॥ ननु तिष्ठति क्षणं मद मधुया वपिवाम्यहं ॥ इत्यादौ वीररसे पि मदोद्वृष्टो लिततत्र निद्रारोदने वा कथ वा
कथमनुभावौ न हि बोधः संयतिनिद्रां तिरोदितिवैतिचेत् ॥ सत्यं ॥ रसभेदे नानुभावभेदः शृंगारे तौ अनुभावा वीरेनयनारुण्यचमत्कारादयः ॥ सामान्येन मदे
नयनघूर्णनवचनस्खलनादयः यथेति ॥ यथा ससनारसयत्यसौ मधुस्वयमद्भुतकमनर्यकंजनु ॥ इति तत्र समस्तमिंद्रियं प्रतिबिंबस्य मिषेण मज्ज
ति ॥ आयासप्रभवः पराभवः ॥ श्रमः ॥ तस्य विभावाः रत्यध्वगत्यादयः ॥ अनुभावाः खेदादयः ॥ यथा ॥ सरमचंद्रसहनिर्गतायास्वेदांबुसंसक्तपयो
धरायाः ॥ अपांगपाते मिथिलात्मजायाः श्रमानशेषाग्निशिथिलीचकार ॥ उत्थानाद्यक्षमत्वमालस्यं तत्र विभावाः गर्भादयः ॥ अनुभावाः क्रियाक्रांत

र० त०

८

र्यादयः ॥ यथा ॥ हरं हरंतं स्तनहारयष्टिं करेण रोद्धुं न शशाक तावत् ॥ गिरेः सुता गर्भवती विहस्य दृगंचलं कातरयांचकार ॥ दुरवस्थादुःखाति
रेकोवा दैन्यं ॥ अनौज्वल्यमिति केचित् ॥ तत्र तस्य बहिर्विषयत्वेन तदनुमापकत्वात् तत्र विभावाः ॥ विरहदारिद्र्यादयः ॥ अनुभावाः ॥ कार्श्यं
शश्रुत्पीडादयः ॥ यथा ॥ तातचरणानां ॥ अंसे कुंतलमालिकास्तनतटे नेत्रांभसां निम्नगामाद्यन्मन्मथकुंजरेंद्रदशनप्रांते विलग्नं मनः ॥ किंचा
न्यद्विरहानलेन सरसं संदह्यमानं वपुर्गंडे पांडिमकैतवेन सुतनोः फेनोच्चयं मुंचति ॥ चिंताध्यानं ॥ ध्यै चिंतायामित्यनुशासनात् ॥ ध्यानं च स्मर
णात्मकं स्मृतिभावस्याग्रे पृथक्केन कथनात्मकं चित्तैकाग्र्यं तत्र विभावाः ॥ इष्टानवाप्तिप्रभृतयः ॥ अनुभावाः तापवैवर्ण्यबाष्पश्वसादयः ॥ यथा
शंभुं ध्यायसि शैलराजतनये किं नाम जानी महे तस्यैवाक्षितनन्नु पादिव तत्रोस्तापः समुन्मीलति ॥ अक्ष्णोरश्रु मिषेण गच्छति बहिर्गंगा लर
गावलिः पांडिम्नः कपटेन चंद्रकलिकाकांतिः समुज्जृंभते ॥ मोहो वैचित्यं मुहवैचित्य इति धातो मोहनं मोह इति ॥ भावस्युत्पत्तोमोहशब्दः ॥
वैचित्यं कार्याकार्यपरिच्छेदः ॥ तत्र विभावाः ॥ भीत्यासक्तोगातो चिंत्यादयः ॥ अनुभावाः स्तंभपालघूर्णनादर्शनादयः ॥ यथा ॥ अंतःस्मरसुवर्णके
तकरलज्जीणी धृतिद्रोहिणी लक्ष्मीं वीक्ष्य समुद्यदिंदुवदनां क्षीरांबुधेरुत्थितां ॥ शंभुस्तंभशलाकुलेशत नखः कर्तव्यमूढेंद्रियः सोप्यज्ञानभुजंगपा
शपतितो जातस्त्रिलोकीपतिः ॥ संस्कारजन्यं ज्ञानं स्मृतिः ॥ संस्कारजन्यं ज्ञानं प्रत्यभिज्ञारूपं स्मरणरूपं च संस्कारजन्यत्वेनोभयसंग्रहः ॥ अन्यथा प्रत्य
भिज्ञायाः पृथग्भावस्वापत्तेः ॥ संस्कारोद्बोधकाः सदृशाः दृष्टचिंताद्याः ॥ अनुभावाः भ्रूसमुन्नयनादयः ॥ प्रत्यभिज्ञा यथा ॥ कालिंदीसरसः समेत्य न

त० ५

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भसः क्रोडपरिक्रीडते चक्रद्वंद्वमिदं सुधाकरकलामाक्रम्य विस्फूर्जति ॥ चंद्रोपि स्मरचापचापलचमत्कारं समालंबते तेन स्मरेव करंवकुंजकुहरे राधाप
रिभ्राम्यति ॥ वदनांबुजलग्नदृष्टि पाते मयि वद्धस्तवतंस मंसमेले ॥ दृकुंचित दृष्टि राधिकायाः स्मितकिर्मीरितमाननं स्मरामि ॥ धृतिः संतोषा
दुःखेप्यबुद्धिर्वा विभावास्तु नशक्त्यादयः ॥ अनुभावाः अव्यग्रभोगादयः ॥ यथा ॥ भवाभस्मरजांसिवेश्मविपिनं वृद्धोवृषोवाहनं चैलं चर्मलथापिम
न्मथरिपोर्भोगः किमुन्नस्यति ॥ इशत्वंकिमु हीयते किमु महादेवेति नो गीयते किं वातस्य नरेव देव इतिवासंज्ञा जनैस्त्यज्यते ॥ रवर्धरक्रियासंकोचो
व्रीडा ॥ न च शंका यां त्रासे चातिव्याप्तिः ॥ तत्र क्रियाविरहएव न तु क्रियासंकोचः ॥ अत्र विभावाः दुराचारादयः ॥ अनुभावाः ॥ शिरोनमनवद
ननयनप्रच्छादनादयः ॥ यथा ॥ अयोध्यावर्णने ॥ भित्तौ भित्तौ प्रतिफलगतं भालसिंदूरबिंदुं दृष्ट्वा दृष्ट्वा कमलनयना केलिदीपभ्रमेण ॥ कां
ते चैलं हरति हरितं लोलमालोकयंती गात्रं प्रच्छादयंती सहसापाणिपंकेरुहेण ॥ इतरेतरक्रियाकौरंग्यक्रियायाः शीघ्रताचापलता ॥ मात्सर्यं
द्वेषरागादयो विभावाः ॥ अनुभावावैरिदर्शनवाक्पारुष्यप्रहारादयः ॥ यथा ॥ लंकाचारिणिसेतुकारिणिरणे क्रीडाचमत्कारिणी भोटानंदवचः प्रसारि
णि पुरो रामे धनुर्धन्वति ॥ जातास्तस्यदशाननस्य समरप्रारंभरंभस्फुरत्केयूरक्वणितानुमेयविशिखत्यागाः करस्त्रेणयः ॥ चेतः प्रसादोहर्षः ॥ प्रिय
दर्शनपुत्रजननाद्यविभावाः अनुभावाः पुलकस्वेदाश्रुस्वरभेदादयः ॥ यथा ॥ पुलकितकुचकुंभपालिरधाव्रजति सुकुंदसुखेंदुवीक्षणाय ॥ विरचयति
नमध्यभंगभीतिंगणयतिनापिनितंबगौरवाणि ॥ आकस्मिकेष्टानिष्टनिपातविवर्तः ॥ संभ्रमोवावेगः ॥ वैरिदर्शनप्रियश्रवणोत्पातादयो विभावाः ॥
अनुभावास्त्वराशरीरस्खलनविपर्यासादयः ॥ यथा ॥ त्वकोवाससिविश्लथेसहचरीस्कंधेद्वितीयः करः पश्चाद्गच्छति चक्षुरेकमितरद्वर्तुं मुखे भ्राम्य

२० त०
६

ति ॥ एकं ढक्क विस्थमस्तिचरणं निर्गंतु मुत्कंठते चान्यद्देरिमगीदृशां रघुपते रालोकसेनाचरानू ॥ सकलव्यवहाराक्षमज्ञानवत्ता जडता ॥ न च मूर्छापस्मारनि
द्रास्वप्नेष्वतिव्याप्तिः ॥ तज्ञानविरहात इष्टानिष्टदर्शनादयो विभावाः अनुभावा अनवभाषणनिर्निमेषप्रेक्षणोष्टानिश्चयपरिच्छेदः ॥ यथा ॥ दुष्पारवारिधि
निपारमुदारवीर्यमागछतो हनुमतो हसितं वितेनुः ॥ उद्वीक्ष्य नीरनिधितीरमधीरवीचिचित्रार्पिता इवपुनः कपयो बभूवुः ॥ आत्मनि सर्वाधिकत्वबुद्धिः
सर्वस्मिन्नधमत्वबुद्धिर्वागर्वः ॥ बलैश्वर्याभिजनलावण्यरूपयोविभावाः ॥ अनुभावाः अवज्ञादृष्टिचेष्टितहसितपौरुषप्रकाशादयः ॥ यथा ॥ परशुरामवाक्यं ॥
निःपीतकलशोद्भवेनजलधौ गौरीपतेर्गंगया हेलितुहंतवपुर्ललाटदहनेयावल्लतः प्रक्रमः ॥ तावत्तत्कपाविवक्षेनगरीनारीदृशांभारुहद्वंद्वप्रस्खलदश्रुवारिपटले
स्पृष्टाः पयोराशयः ॥ इष्टसंशयोऽनिष्टजिज्ञासाविषादः ॥ इष्टपदेनजीवनधनयशःशरीरपुत्रकलत्रादयः ॥ यथा ॥ प्रस्थायंत्यापदिव्रजाभिभकर्णवाचां
भवेलत्यक्वो निर्गछामि निकुंजमेव यदिवाकोवेदकिंस्यादिति ॥ निष्ठाप्यैवं यदिक्षचिद्वनतटे किंजालमेतावता मध्येवर्त्मकलानिधेः समुदयो जातः किमात
न्यतां ॥ औत्सुक्यंकालासहिष्णुता सकलेंद्रियाणामेकदैवक्रियाप्रारंभोवा ॥ प्रियस्मरणादयो विभावाः ॥ अनुभावास्तंद्रागात्रगौरवादयः ॥ यथा ॥
आद्यः केरपिकेलिकौतुकमनोराज्येद्वितीयस्पुनः मल्लीकेतककाचारुचंपकनवांभोजस्रजां गुंफनैः ॥ कांचीकुंडलहेमहारवलयन्यासैस्तृतीयस्त्वतो
नीतः सुंदरिवासरस्यचरमो यामः कथं यास्यति ॥ इतरेंद्रियमपहायमनस्त्वचियदावर्तते तदानिद्रा ॥ सुप्तस्यकारणखोत्सुतापाडिनिद्राक्षरतेनोक्ता
स्वप्नवहनाडिकायां मनोयदावर्तते तदास्वप्नसंभवः ॥ विभावाः स्वभावचिंतालस्यक्लमादयः ॥ अनुभावाः पार्श्वकरणनयनभ्रूचलनविभ्रमवचनस्व
प्नदर्शनादयः ॥ यथा ॥ गछन्कछंतत्पन्दुहितुः पिछपुछावतंसः पश्यभस्मद्वन्मसक्रुच्चक्षुषाकुंचितेनलिग्धापांगः शिथिलचरणः स्तोकविस्पष्टहासः

रामू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रे

स्वप्ने दृष्टः कमलकलिकामंडनो मेघखंडः ॥ ग्रहाद्यावेशोपस्मारः ॥ तत्र विभावाः अपावित्र्यशून्याच्छितिधातुवैशम्योक्त दुःखभयादयः ॥ अनुभावाः ॥
कंपफेन निःश्वास भूनिपात विस्फूर्यसि जिह्वालोलनादयः ॥ यथा ॥ उद्वेल्लन्नवपल्लवाधररुचः पर्यस्तशाखाभुजाः स्फूर्जत्कोरकफेनबिंदुपटलव्या
कीर्णदेहश्रियः ॥ भ्राम्यद्भृंगकलापकुंतलजुषः श्वासानिलोत्कंपिनाः शैलं चौक्ष्यकंपे निपातितमपस्मारं दधुर्भूरुहाः ॥ मूर्छाप्यत्रैवांतर्भवति ॥ त्यच
मपि विहायमदामनः पुरीतति वर्तते तेन दासुप्त ॥ निद्रा विभावाः ॥ अनुभावा नेत्रमीलनप्रलापश्वासोच्छ्वासादयः ॥ यथा स्वैरोसोच्छ्वासप्रचलदधरोपां
तमामीलिताक्षं क्रीडाकुंजे तपनदुहितुः सुप्तः श्रीमुरारेः ॥ अतः स्मेरं निभृतनिभृतं कापि कर्णावतंसं का चिद्धाहोः कनककवलयं दाममुच्छ्वातिकाचित् ॥
इंद्रियाणां प्रथमप्रकाशो विबोधः ॥ निद्राच्छेदो विभावः ॥ अनुभावा उअंगाकृष्टिजृंभाक्षिमर्दनांगुलिमोटनादयः ॥ यथा राधायाः सहसादृशा कुवलयद्रोणी
दरिद्रं नभः कुर्वंत्याः कलंठकंठनिनदैः सांकेतिके जाग्रतः अंगाकृष्टिविवर्तमानवपुषोदेवस्य कंसद्विषो लीलापांगतरंगभंगचतुरं नेत्रांबुजं पातु नः ॥ पराहं
कारप्रशमोत्कटसमीहामर्षः ॥ विभावाः अवमाननाधिक्षेपादयः ॥ अनुभावाः स्वेदशिरःकंपनयनारुण्यादयः ॥ यथा ॥ अद्यात्रैव भर्तुः हरसिज नमनास्तनु
सेनासमेतं बध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयामः ॥ शश्वन्मार्गावलोकप्रचलनयनयासीतयासाकमेनां लंकामुत्साद्य किं वा रघुपतिचरणांभोजयो
र्योजयामः ॥ आकारव्याहारसंगोपनमवहित्थं विभावाः ॥ व्रीडाधाष्टर्य कौटिल्यगौरवादयः अनुभावाः अन्यथाकरणान्यथा प्रेक्षणान्यथा कथनादयः ॥ यथा ॥
सकलसमविभीषणः सगतबान्धवः सपाथो निधिः किंचित्कुध्यति सोपि सारणल सीतापरित्यज्यतां ॥ दूत्याकर्ण्य सुहृद्वृणस्य वचनं स्मेराननो रावणो मुक्तादामकरे
णकंटकविधे क्रीरस्य विन्यस्यति ॥ उग्रता निर्दयता ॥ विभावाः अपराधदोषकीर्तनचौर्यादयः ॥ अनुभावाः तर्जनताडनादयः ॥ यथा ॥ कोदंडरणभिक्षभू

र० न०
१

पतिभुजादंडे प्रचंडैः श्लतं तत्र ज्याप्रतिपक्षराजरमणीवेणीगुणेर्गुंफितात्क्रूराकारकुठारतारतपनप्रभ्रष्टकुष्टद्विपन्नुत्यद्दृंतलेः कृतोत्विविशिरखेस्त लक्ष्यमु
द्दीप्यते ॥ यथार्थज्ञानं मतिः तत्र विभावाः शास्त्रचिंतनादयः ॥ अनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनचातुर्यादयः ॥ यथा ॥ लाटीनेत्रपुटीपयोधरघ
टीक्रीकुटीरोत्सटीपाटीरद्रववर्णनेनकविभिर्मूढैर्दिनं नीयते ॥ गोविंदेति जनार्दनेति जगतीनाथेति कृष्णेति च व्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति ॥
नयविनयानुनयोपदेशोपालंभास्तत्रैवांतर्भवंति ॥ उपदेशो यथा ॥ यमुनदेयं रलतो यधेयं मनोनिधेयं चरणे हरस्य ॥ निजं विधेयं कृतिभिर्विधेयं विधेर्विधेयं
विधिरेव वेत्ति ॥ उपालंभो द्विविधः ॥ प्रणयात्मकोपात्मा च ॥ प्रणयात्मा यथा ॥ पाषाणेयदि मार्दवं यदि पयोधारा हुताशोदरे व्यालीनां च दुनेसुधा यदि रवे र्गभे हि
मानी यदि ॥ स्तु मा किं च समीरणेयदि तदा स्वप्नेभवेत्सत्यता किं नाम स्मरभूमिपाल भगवन्क्रोधात्सुधा धावसि ॥ कोपात्मामर्ष एवांतर्भवति ॥ यथा जनय
सि जगदेव देव देवाभरण सुधारसशीतलं सुधांशो ॥ उरसि विरहस्तिमेतथापि तापं यदुपतिवल्लभसखासि किं ब्रवीमि ॥ ज्वरादिविकारो व्याधिः ॥ कुपित धातुकाम
क्लेशादयो विभावाः ॥ अनुभावाः दशोपद्रवाः ॥ यथा ॥ दातुं खीयमनर्घ्यरीधितिपदं तस्याः कुरंगीदृशः केयूरं कनकांगुलीयकमिवानेतुं बहिर्गच्छति ॥ उ
न्यत्कृत्स्नं निवेदयामि किमिति वेणीमिषात्कालियोदच्छूलोचनवारिकालियसरोभ्रांत्यापरिभ्राम्यति ॥ विना विचारमाचार उन्मादः ॥ नच्चागम्यागमने
तिव्याप्तिः ॥ विना विचारमिति इदं न वारणात् ॥ न च सुरवसुहृदृश्यंते दृशो विचार एव ॥ क्रियानसमीचीनेत्यन्यदेतत् ॥ अप्रेक्ष्यकारिक्रियोन्मादः इति यत्समतं
तत्रेदं दूषणं ॥ तत्र विभावाः प्रियविप्रयोगविभवभ्रंशादयः ॥ अनुभावाः प्रपालपितव्यारोदनादयः ॥ यथा नैषा कापि च कांतिकाचनलतासैवालिमेयधि
का पश्यंचेन्नकुतोपि जल्पति तदा संमूर्छिता वर्तते ॥ दृष्टुंदृतविचिंत्य सिंचति मुहुर्नीरैरधीरैर्दृशो र्वातं व्यातनुते करेणसुजयेराधाय संभाव्यते ॥ प्राणनिष्क्र

रा०
०

१

मणंमरणं ॥विभावानुभावौ स्फुटौ ॥यथा पर्यस्तां घ्रिविकर्णबाहुपततः संग्राममूर्मोभिपालकेशासनक्रेधपाशमनिलप्रद्युंसमाकांक्षति ॥उत्स्मं नोत्मकरः क
रं किरतिवाय स्फारविंदेनवास्वेस्वेधाम्निमिथः प्रणामपिसुराः भ्रष्यक्रमानन्यते ॥ मनो विक्षोभस्त्रासः ॥ तथा च विचारो छोमनो विक्षोभो भीतिरा कस्मिक मनःक्षो
भस्त्रास इति विक्षोभे तौ बद्धयोरेकत्वेन परिग्रहः ॥ तत्र विभावाः घोरस्वनश्रवणघोरसत्वदर्शनादयः ॥ अनुभावास्तंभस्वेदरोमांचगात्रतापादयः ॥ यथा ॥ भण्वा
नोहरिनाम रामबद्धना दिद्रस शंकां वहन्कुर्वन्कातरमांतरं सभगवान्मैनाकभूमीधरः कुंचत्सक्षतिभुग्निमश्रुतिकृतप्रत्यंगचोलाकृतिस्तकथ्यात्स्थितिसिंधुरा
जकुहरे निर्मक्कुमारांकते ॥ विचारो वितर्कः ॥ विभावा विप्रतिपत्ति संशय साधक बाधकमान समुद्भवनादयः ॥ अनुभावाः ॥ शिरकंपभ्रूचालनादयः ॥ वि
तर्कश्चतुर्विधः ॥ विचारात्मा संशयात्मानध्यवसायात्मा विप्रतिपत्यात्मा चेति ॥ अनध्यवसाय उत्कटकोटिकः संशयः ॥ यथा ॥ कालिंदीविलुठत्क
ठोरकमठ क्रूरं धनुः शांभवं रामो बाणमृणालकोमलवपुर्वंशावतंसो भुवः ॥ व्याहारप्रवराः खलाक्षितिभृतां गोष्ठीगरिष्ठाः पुरस्तस्मात्केवलमेष तिष्ठति म
मश्रेयस्करो भास्करः ॥ यथा ॥ सौंदर्यस्समनोभवेन गणनारेखा किमेषा कृता लावण्यस्य विलोकितुं त्रिजगतीमेषा किमुद्घाटिका ॥ आनंदद्रुममंजरी नय
नयोः किं वा सुजृंभते राधायाः किमुवास्तभावसुभगा रोमालिरुन्मीलति ॥ यथा वा ॥ कथय कथय केयं खंजनं लेखयंती विहरति यमुनायाः पाथसि
स्वर्णवल्लिः ॥ अयमुदयति कोवाराग रंगः शशिनि भानुः नद्दुपरि तिमिराणामेष कोवाविवर्तः ॥ यथा वा ॥ इयं न विलसत्सुधाकरकलो धिकाराधिका करं कि
रणमालिनः किमु सहेत तस्या वपुः ॥ नवाकनकमंजरी वहति खंजरीटं यतः स्तनस्मरमरालसा कथयके यमुन्मीलति ॥ ननु दशावस्थास्वभिलाषगु
णकथाप्रलापा व्यभिचारिभावाभ्यंतरेन गणितास्तत्किं स्वतंत्रा एव तेसंनीति चेन्न ॥ औत्सुक्ये भिलाषस्य वर्णनात्मकस्मृतौ गुणकथायाउन्मादे प्रलाप

रसतरंगिणी

९०

स्यांतर्भावात् ॥ अत्र प्रतिभाति ॥ छलमधिको व्यभिचारिभाव इति ॥ तांबूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नितः इति शृंगारे दर्शनात् ॥ रौद्रे चेंद्रजालाद
यः ॥ हास्ये च व्यपदेशान्यापदेशयोर्दर्शनात् ॥ वीथीभेदेन गणनाच्च ॥ संगुप्तक्रियासंपादनं छलं ॥ विभावा अवमानप्रतिपक्षकुचेष्टादयः ॥ अनु
भावा वक्रोक्ति निभृतवीक्षणाकृतिप्रच्छादनादयः ॥ शृंगारे यथा ॥ संकेतीकृतकाननं प्रविशतो रन्योन्यकौतूहलाद न्यत्प्रतिभानमारचयतोरन्योन्य
मुरक्षस्पनो कुंचत्कायमितस्ततः किसलयैरात्मानमाच्छन्नवतो राधामाधवयोर्निकुंजकुहराद्दृष्टीविकापातु नः ॥ संग्रामे यथा ॥ सप्तापि क्रूला च्छपटांबु
राशीन्पुरोपकंठे पुनरीक्षमाणाः ॥ द्रोणेश्च पींदस्यसुखेसरखेद्मा योजयामास सरामचंद्रः ॥ सर्वाणि व्यभिचारिस्थलानि विस्तरभियानोदाहृतानि
आलस्यौग्र्यजुगुप्साख्यं भोगोवर्ज्यः ॥ विप्रलंभे आलस्य ग्लानि निर्वेदश्रमशंकानिद्रौत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूयाव्यभिचा
रिणः ॥ हास्ये ऽवहित्थालस्यसुप्तनिद्राप्रबोधाव्य० ॥ करुणे मोहनिर्वेददैन्यजाड्यविषादभ्रमापस्मारोन्माद व्याधालस्य स्मृतिवेपथुस्तंभस्वर
भेदाश्रूणिव्य० ॥ रौद्रे उत्साहस्मृतिखेदावेगामर्षरोमांचचंचलतौग्र्यतास्वरभेदकंपाव्य० ॥ वीरे उत्साहधृतिमतिगर्वावेगामर्षौग्र्यरोमांचाव्य०
भयेस्तंभस्वेदगद्गदतारोमांचवैवर्ण्यशंकामोहावेगदैन्यचापलत्रासापस्मारप्रलयमरणाव्य० ॥ बीभत्से पस्मारमोहावेगवैवर्ण्यानि व्य० ॥ अद्भुते
स्तंभस्वेदगद्गदताश्रुरोमांचविभ्रम व्य० ॥ अन्येच भावा रसानुकूलास्तयमूह्याः स्थायिनोपि व्यभिचरंति ॥ हासः शृंगारे रतिः शांतकरुणे
हास्येषु ॥ क्रोधो वीरे ॥ भयशोकश्शृंगारयोः जुगुप्साभयानकेउत्साहविस्मयौ सर्वरसेषु ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां व्य
भिचारिभावनिरूपणं नाम पंचमस्तरंगः ॥ अथ रसा निरूप्यंते ॥ विभावानुभावसात्विकभावव्यभिचारिभावैरुपनीयमानः ॥ परिपूर्णस्था

राम

९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिभावो रस्यमानोरसः ॥ भावविभावानुभावव्यभिचारिभावैर्मनोविश्रामोपनक्रियते सवारसः ॥ प्रबुद्धस्थायिभाववासनावारसः ॥ प्रबोधकावि
भावानुभावव्यभिचारिभावाः ॥ नच यूनोः प्रथमानुरागेऽव्याप्तिः ॥ पूर्वानुभवाभावादितिवाच्यं ॥ तत्रापिजन्मांतरीयानुभवसत्वादिति ॥ सचरसोद्वि
विधः ॥ लौकिको ऽलौकिकश्चेति ॥ लौकिकसन्निकर्षजन्मालौकिको ऽलौकिकसन्निकर्षजन्मात्वलौकिकः ॥ लौकिकः सन्निकर्षः षोढा विषय
गतः ॥ अलौकिकसन्निकर्षो ज्ञानं तेषु चानुभूतेषु साक्षात्कारेतज्जन्मान नुभूतेषु प्राक्तनसंस्कारद्वाराज्ञानमेव प्रत्यासत्ति ॥ अलौकिकोरसस्त्रिधा ॥
स्वाप्निको मानोरथिक औपनायिकश्चेति औपनायिकश्च काव्यपरपदार्थचमत्कारे ॥ नाट्ये च ॥ किंतु द्वयोरप्यानंदरूपता ॥ ननु मानोरथिकोर
सोनप्रसिद्ध इति चेत् ॥ सत्यं ॥ अस्माकं तु मनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषामायुः परंक्षीयत इत्यादौ मानोरथिक
शृंगारस्य वर्णनात् ॥ शास्त्रे सुखस्यैव विषयगणना च रसेन विना च सुखानुत्पत्तिरिति ॥ तत्र विशेषाः यदाह भरतः ॥ शृंगारहास्यकरुणरौद्रवीरभ
यानकाः ॥ बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ सकलाधिदैवतं विष्णुः स च शृंगारस्याधिदैवतं ॥ तेन सकलाकांक्षाविषयत्वेनाराध्यतया
च प्रथमं शृंगारोपन्यासः ॥ ननु वात्सल्यं लौल्यं भक्तिः कार्पण्यं वा कथं वा न रसाः ॥ आर्द्रताभिलाषश्रद्धास्पृहाणां स्थायिभावानां तत्र सत्वादिति
चेन्न ॥ तेषां व्यभिचारिरत्यात्मकत्वात् ॥ ननु कस्य रसस्यैते व्यभिचारिभावा भवेयुरिति चेत्सत्यं ॥ वात्सल्ये करुण एव रसः ॥ लौल्ये हास्यः भक्तौ शां
तः ॥ कार्पण्ये हास्यः ॥ नन्वेवं परत्र क्लृप्तत्वात्तत्र व्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातो धर्मकल्पनाया लघुत्वाच्च ॥ व्यभिचारिणि रतिरेवास्तु किं

KKSU LIBRARY
RAMTEK
441 106
M-1871
Dist Nagpur

करुणेनेति चेन्न ॥ रतेः शोक इति शोककारणतायां रतेरुपक्षयात् ॥ किंच रतेः कस्य रसस्य व्यभिचारित्वं ॥ न शृंगारहास्यवीररौद्राणां ॥ युवमिथु
न परस्परप्रीतिहासक्रोधानंदानां तत्राभावात् ॥ न बीभत्सस्य ॥ जुगुप्साया तत्राभावात् ॥ नाप्यद्भुतस्य ॥ विस्मयस्यापि तत्रास्थिरत्वात् ॥ तस्माच्छोक
स्य स्थायितया स्थायिशोकभावकः ॥ करुणाख्यो तिरिक्तोरसइति ॥ ननु रतिरेवास्तु किं हास्येनेति चेत्सकस्यास्तु व्यभिचारी ॥ करुणरौद्रवीरभ
यानकबीभत्सानां तत्रानवकाशात् ॥ नाप्यद्भुतस्य ॥ विस्मयस्य तत्रास्थिरत्वात् ॥ न शृंगारस्य रतेः स्थायित्वाभावात् ॥ परं तु रत्यासह हास्यस्य सा
कर्यं ॥ ननु रतिहास्ययोरसंकीर्णस्थायिभावत्वे पृथक्कथं स्यादिति चेन्न ॥ हेतोरसाधारण्यात् ॥ असाधारण्यमत्र स्थायित्वं ॥ यथा रतिसांकर्ये
पि स्थायिशोकोऽसाधारणत्वात्कारणात् करुणोभिधीयते यथा तत्सांकर्येपि स्थायिहासभावादसाधारणात्कारणात्हास्योभिधीयते ॥ शांतेप्येवमस्
त्वं ॥ न च वात्सल्यादावप्यसाधारणो हेतुरार्द्रतादयः ॥ संश्लेषेतितेषाम विरसत्वापत्तिरितिवाच्यं ॥ आर्द्रतादीनामपि रतित्वात् ॥ तस्यास्तत्रा
साधारण्ये शृंगाररसत्वापत्तिः ॥ ननूत्साहक्रोधाद्युभय यत्र ॥ तस्माद्वीररौद्रयोरन्यतरएव रसो वक्तं ना मिति चेन्न ॥ स्थायिभेदेन भेदात् ॥ उत्साह वासनावीरे
न तु रौद्रक्रोधवासना रौद्रे न तु वीर इति ॥ यूनोः परस्परं परिपूर्णः प्रमोदः सम्यक् परिपूर्णो रतिभावो वा शृंगाररसः ॥ यूनोरेकस्य प्रमोदस्तयोराधिक्ये
न्यूनमाया वा तिरेकेवापरिपूर्णरभावाद्रसाभासइति ॥ स च द्विविधः ॥ संभोगो विप्रलंभश्चेति ॥ तत्र दर्शनस्पर्शनसंलापाभिरितरेतरमनुभूयमानं सुखं
परस्परसंयोगे नो तद्यमानआनंदो वा संभोगः ॥ संयोगोबहिरिंद्रियसंबंधः ॥ अस्य दैवतं विष्णुः ॥ वर्णः श्यामः ॥ यथ ॥ क्षोभेन चाटुवचनानि परा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतानिपाणिः पयोधरयनोजडतांजगाम ॥ लक्ष्म्याः परंतु पृथुवेपथुरेवनीवीविस्रंसयन्सुहृदमूनमधुसूदनस्य ॥ यथा ॥ निद्राणेक्षणसुभ्रमप्यवदनं कांते
कुचांतःस्पृशिस्रस्तव्यस्तदुकूलदर्शितवलिप्रव्यक्तनाभिश्रियः ॥ राधायास्तत घूर्णदुत्पलदलद्रोणीमदद्रोहिभिः दृक्कोणस्यतरंगितैर्विरचितोदीर्घा
युरेवस्मरः ॥ देशानांसमयाद्यंगंनायिकानांचभेदेननायकयोरवस्थाभेदेनचबहलोभेदास्तेचरसमंजर्यां विशेषतोदर्शिता इहपुनर्विस्तरभियानप्र
दर्श्यतइति ॥ अथहावानिरूप्यंते ॥ तत्रभरतः ॥ लीलाविलासोविछित्तिर्विभ्रमः किलकिंचितं ॥ मोट्टायितंकुट्टमितंविब्बोकोललितंतथा ॥ विहृतंचे
तिविज्ञेयादशहावास्तुयोषितां ॥ नारीणांशृंगारचेष्टाक्षेपाः ॥ सचस्वभावजोनारीणां ॥ ननुचिब्बोकविलासविछित्तिभ्रमाः ॥ पुरुषाणामपिसंभवंतीति
चेत् ॥ सत्यं ॥ तेषांसोपाधिकाः ॥ स्वाभाविकाः स्त्रीणामेव ॥ नन्वेवंयदितासांसदैवतेकथंनसंभवंतीतिचेत् ॥ सत्यं ॥ उद्दीपकान्वयव्यतिरेकाभ्यांनायिका
नांहावाविर्भावतिरोभावाविति ॥ लीलाविलासविछित्तिविभ्रमललितानिशारीराणि ॥ मोट्टायितकुट्टमितविब्बोकविहृतानिचांतराणि ॥ किलकिंचितमु
भयसंकीर्णमिति ॥ प्रियभूषणवचनाद्यनुकृतिर्लीला ॥ तत्रविभावः ॥ सखीकौतुकलापः ॥ अनुभावः ॥ प्रियपरिहासः ॥ यथा ॥ चंडांशोचरमाद्रिचु
बिनिमनोजिज्ञासितुंसुभ्रुवान्यंचत्कौतुकयातयाविरचितेवंशीरवेराधया ॥ एषस्फूर्जतिकस्यनिस्वनइतिक्रोधाद्रुजन्काननंराधांवीक्ष्यलप्रतानपिहि
तांस्मेरोहरिःपातुवः ॥ गमननयनभ्रूभ्रमतीनांयत्किंचिद्दुत्पद्यतेविशेषः सविलासः तत्रविभावाः ॥ प्रियदर्शनस्मरणादयः ॥ अनुभावाः ॥ अभिला

रसतरंगिणी०
१२

षवैदग्ध्यप्रकाशनसंकेतप्रीतिप्रकटनादयः ॥ यथा ॥ कूजत्कांचिररस्फुरद्वलिनटद्भ्रूवल्लिवेल्लद्दृशः वल्गत्कुंडलकांतिसाचिवलितग्रीवंलपंत्यावचः ॥
प्रातर्नर्तितपुंडरीकपरिषत्पांडित्यपाटच्चरीदृष्टिर्यंप्रतिजायतेवरतनोर्वक्रासशक्राधिकः ॥ कतिपयभूषणविन्यासोविछित्तिः ॥ तत्रविभावाः ॥ सो
कुमार्यप्रियसौभाग्यसौंदर्यगर्वक्रोधक्लेशादयः ॥ अनुभावाः ॥ गर्वमानक्लेशप्रकाशनादयः ॥ यथा ॥ केयूरंनकेयूरेणहेनकटकंमौलौनमालापुनः ॥
कस्तूरीतिलकंतथापिननुतेसंसारसाराश्रियं ॥ सर्वाधिकयमलेरविभालफलकेयद्देधसासुभ्रुवोजानीमःकिमुतत्रमन्मथमहीपालेनमुद्राकृतः ॥
वागंगभूषणानांस्थानविपर्यासोविभ्रमः ॥ तत्रविभावाः ॥ धनमदरागोत्कंठ्यादयः ॥ अनुभावाः ॥ प्रियसख्याद्युपहासादयः ॥ यथासक्तेकेलिवि
धौनिजांशुकधियापीतांबरस्यांशुकंपद्मायाः परिधायसप्रभशयनाद्भ्रांतः प्रयांत्याबहिः ॥ आघ्रातुंवसनांचलंचलपलयन्कोपं दृशादर्शयन्वाचा
कौतुकमाचरन्स्मितसुधास्निग्धोहरिः पातुनः ॥ श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानांसंकरः ॥ किलकिंचितं ॥ तदाह ॥ श्रमाभिलाषगर्वाणां
स्मितहर्षभयक्रुधां ॥ असकृत्संकरःप्रोक्तोविज्ञेयंकिलकिंचितमिति ॥ अत्रविभावाः ॥ नवयौवनोद्रेकचांचल्यादयः ॥ अनुभावाः ॥ कर्तव्यानिर्धार
णादयः ॥ यथा ॥ कोदंडमारोहतिचंडिमानंमधुव्रतः कांक्षतिरोणिमानं ॥ पपंसुधांवर्षतिवेपमानंस्वर्णाचलःस्विद्यतिकिंचिदाननं ॥ यथावा ॥
क्रोधागारसमुत्थिताः समुदयसंत्रासशैलार्दिताव्रीडाभिःपरिमर्दिताःस्मितसुधाधाराभिरुद्वर्तिताः ॥ स्नाताःस्नेहरसैर्मनोभवकलामालाभिराभूषि
ताःपायासुर्मयिशैलराजदुहितुःस्फीताः कटाक्षच्छटाः ॥ वार्तावैसुखेसतिनिम्नभ्योदर्शनस्पृहामोट्टायितं ॥ अत्रविभावाः ॥ सपत्नीभासल

राम०
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क

आदयः ॥ अनुभावाः ॥ मनःप्रेमैथनसंकेतनिवेदनादयः ॥ यथा तल्लेहस्य कथारसंक्रममपि श्रोतुं समुत्कंठते राधा किंतु विकीर्णरलकपटाग्रगत्यसौ धाद्
दिः ॥ नत्यन्नेत्रपुटि स्फुरत्कुचघटि स्वेदोल्लसद्दोर्लताटिप्यावस्था द्रुकुटि स्खलत्पति पुनः कृष्णांतिके भ्राम्यति ॥ सुखेदुःखचेष्टाकुट्टमितं ॥ तत्र विभावाः
रागो खंड्यदशनक्षतकुंतलाधरयहणादयः ॥ अनुभावाः ॥ कपटकायसंकोचकपटसीत्कारादयः ॥ यथा ॥ रोद्धुं पाणिः प्रचलति चिराद्वंगुलिर्निष्ठ्व
लासौ भ्रूविक्षेपो भवति कुटिलो नेत्रमंतःप्रसन्नं ॥ गाढाश्लेषे जपति सुतनोरर्धमात्रो नकारः कंपो मूर्ध्नः प्रसरति सुखं से सुखं न प्रयाति ॥ गर्वाभिमानसंभ्र
तो विकारो नादरात्माबिव्वोकः ॥ अत्र विभावाः ॥ यौवनमदधनमदकुलमदप्रियापराधादयः ॥ अनुभावाः ॥ अवहित्थदुर्वचनदुःप्रेक्षणादयः ॥ यथा
कृतांजलिःकातरदृष्टिनिपातः प्राणेश्वरः पार्श्वमुपाजगाम ॥ सखीमुखे कुंडलरत्नरेखामेषा पुनःप्रेक्षितुमाचकांक्ष ॥ सकलांगसमीचीनविन्यासोल
लितं ॥ अत्रैव स्मितादयोंतर्भवंति ॥ तत्र विभावाः ॥ मनःप्रसादप्रियतमदृगनुरागधीरत्वादयः ॥ अनुभावाः ॥ प्रियवशीकरणलोकानुरागचमत्का
रादयः ॥ यथा ॥ कलक्वणितमेखलचपलचारुनेत्रांचलं प्रसन्नमुखमंडलं श्रवणसंचरत्कुंडलं ॥ स्फुरत्पुलकबंधुरं लपितशोभमानाधरं विहा
स्य रतिमंदिरं व्रजति कस्य शातोदरी ॥ प्रियसंनिधावभिलाषापरिपूर्तिर्विच्छित्तिं ॥ तत्र व्याजलज्जादयो विभावाः ॥ अनुभावाः ॥ अन्यथा
चेष्टितान्यथाव्यवहारादयः ॥ व्याजाद्यथा ॥ अभिलषति कपोले चंद्रचूडे विधातुं तिलकमुरस्यदंतः कोपभाजा भवान्या ॥ फणिपतिभयक
टाक्षं मुक्तकंपयं स्या प्रचलवसनवातैर्विघ्निताः केलिदीपाः ॥ लज्जातो यथा ॥ आनंदभाजो यदुनंदनस्य करावरोधं न करेण कुर्याः ॥ स

रसमंजरी सि० ॥ १५

खीं लपंतीमितिसंजघान च कोपनेत्राचुलकोत्पलेन ॥ यत्रोरन्योन्यं मुदितामां पंचेंद्रियाणां संबंधाभावोभीष्टाप्राप्तिर्वा विप्रलंभः ॥ नन्वमानात्म
के विप्रलंभे व्याप्तिरितिवाच्यं ॥ मुदितपंचेंद्रियसंबंधाभावरूपस्य विशिष्टाभावस्य तत्रापि सत्वात् ॥ तदानीं यूनोरिंद्रियाणाममुदितत्वाभावात् ॥
ननु पाश्रियमभिसरति सा विप्रयुक्ताभवेदितिचेत् ॥ सत्यं ॥ सा विप्रयुक्तैव ॥ अचिरदर्शनप्रत्याशानुवृत्तप्रमोदेन विरुद्धधर्मस्याप्युपात्ताद्संभवई
ति ॥ स च विप्रलंभः पंचधा ॥ देशांतरगमनगुरुनिदेशादभिलाषादीर्ष्यायाः शापाच्चेति ॥ समयादैवाद्विदुरादित्यादयोप्यनेयाः ॥ देशांतरगमना
द्यथा ॥ प्रस्थानाय कृतोद्यमे प्रियतमे दोकंकणेनच्युतं धैर्येणस्खलितं मदेनगलितं नेत्रांभसानिःसृतं ॥ जीवेनापि पियियासुना शिव शिव प्रारभि
वामभ्रुवः कंपाद्दोलितकिंकिणीकलरवव्याजेन वैन्यस्मृतिः ॥ यथा तातचरणानां ॥ वीणामंके कथमपि सखीप्रार्थनाभिर्निधाय स्वैरं स्वैरं सरसि
जदृशा गातुमारब्धमेव ॥ तंत्रीवुध्या किमपि विरहक्षीणदीनांगवल्लीमेनामेव स्पृशति बहुशो मूर्छनाचित्रमेतत् ॥ गुरुनिदेशाद्यथा ॥ भास्ताभ्रमत
नदुर्गुरुर्मनसिजः कोप्येष भृंगस्तमो मंदो गंधवहः सितोमलयजो दोषाकरो माधवः ॥ अंगारो नवपल्लवः परभृतो विज्ञो गुरोराज्ञया निर्यातो
सि किं विचारिता कथममी क्रूराः ग्रहान्त्वया ॥ अभिलाषाद्यथा ॥ आगारामिमुखं मुखं रचयतो वक्रीकृतग्रीवयोर्व्यस्तं चोलमजानतो क्वचिदपि व्याजा
त्पुनस्तिष्ठतो मार्गं विस्मरतो पुनः क्वचिदपि त्यक्ताक्षरं जल्पतो ॥ सा चिप्रेक्षितमावयोर्यदभवत् भयस्तदाशास्महे ॥ ईर्ष्यातो यथा ॥ प्राणेशस्य प्रभ राम० १३
वतिमनः प्रेम हेमप्रसूनं चेतश्चूतं दगपि कमलं जीवनं बंधुजीवं ॥ आशास्त्रे ग्रथितमखिलं बंधसात्स्यभंगे स्याद्देतेषामपि निपतनं चंडिमानं

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमुंच ॥ शापाद्यथा ॥ अन्यत्र यादि निर्गंतु मिछा निर्गछ दूरतः ॥ प्रियाविरहतापेन त्वं परंधो भविष्यसि ॥ समयाद्यथा ॥ विश्लेषजीवनश्रीडापीडाविधुर
मानसा ॥ तस्थौ प्रातः प्रियं प्रेक्ष्य चक्रीव श्रीकीतानना ॥ दैवाद्यथा ॥ जीवने सति विश्लेषो विश्लेषे सति जीवनं ॥ द्वयोरप्यनयोर्भूनो महमेव निदर्शनं ॥ विद्राद्य
था ॥ केलीगृहे वामणिमंदिरे वा शशांकमौलें कानने गरे हुताशनः ॥ इतस्ततः प्रस्थितयोर्नवूनोर्वियोगजन्माविरराम वह्निः ॥ इति श्रीभानुदत्तमिश्रविरचिता
यां रसतरंगिण्यां रसनिरूपणं नाम षष्ठस्तरंगः ॥ ॥ हासस्य परिपोषो हास्यः ॥ वर्णोस्य शुभ्रो दैवत प्रथमः ॥ स च द्विविधः स्वनिष्ठः परनिष्ठश्चेति ॥
तावप्युत्तममध्यमाधमभेदास्त्रिधा इति षड्विधो भवतः ॥ स्वनिष्ठोपि षड्विधः ॥ परनिष्ठोपि षड्विध इति द्वादशविधो हास्यः ॥ तथाहि ॥ उत्तमानां स्वनिष्ठेप
रनिष्ठे च स्मितहसिते ॥ मध्यमानां स्वनिष्ठे परनिष्ठे च विहसितोपहसिते ॥ अधमानां स्वनिष्ठे परनिष्ठे चापहसितातिहसिते ॥ उत्तमानामीषत्कपो   द्विकसित
लमध्यमदर्शनमपांगसुधुवीक्षितं स्मितं ॥ उत्फुल्लकपोलं किंचिल्लक्षितदशनं हसितं ॥ मध्यमानां समयोचितमुत्तमस्वनमाकुंचितमुखमाविर्भूतवदनरागं
विहसितं ॥ उत्फुल्लनासापुटं कुटिलवीक्षितं कुंचितग्रीवं सस्वनमुपहसितं ॥ अधमानां मुखमतमुद्घदश्रुकंपितमौलिस्फुटवरस्वनमपहसितं ॥ अत्युद्धतं बहलाश्रु
स्फुटमस्वनमाश्लिष्टपार्श्वजनमारब्धकरतलमतिहसितं ॥ स्वनिष्ठस्मितं यथा ॥ लेखनीमितइतो विलोकयन्कुत्र कुत्र नगगामपद्मभूः ॥ तां पुनः श्रवणसीम्नि लेखि
तां प्राप्य सस्मितमुखः स्मितं दधौ ॥ स्वनिष्ठहसितं यथा ॥ रोमांकुरं व्योमगतं रदाग्रैस्सुधां घुति स्वीयमुदीक्ष्य विष्णोः ॥ यद्हासहास्यं किमु नक्षयोधाः वद्यापि फेनस्तवकाय
मानं ॥ परनिष्ठस्मितं यथा ॥ द्वारवृषभमुखेरखेलमाजवतिसुवर्णसुवर्णकांति पर्णं ॥ दृशि भुजगपतेः शिशुः षडास्यः कुवलयलिकुड्मलं निकेश्वभवान्याः ॥ परनिष्ठं

रसतरंगिणी०
१५

विहसितं यथा ॥ निशासु तैलस्य धियागृहीतैर्मशीजलैर्लिप्तमुखारविंदं ॥ गोपं प्रभाते स्खलदश्रुनीरमधीरनादं जहसुस्तरुण्यः ॥ परनिष्ठमुपहसितं यथा
योनिरोधो मम्मार ध्वइति पठ्यपन्नुनः ॥ शम्भुहत्फुल्लनासेन तत्र स्कंदेनोपहस्यते ॥ परनिष्ठमपहसितं यथा ॥ रतोत्सवे वल्लभयत्नसत्रं कंठावलग्नं परिमो
चयंती ॥ द्विजांगनादर्पितरंभसंतीं तारस्वनं वारवधूर्जहास ॥ परनिष्ठमतिहसितं यथा ॥ चोरः कामरिपोर्गृहं निशिगतः भूर्लकपालं हरन्बीजं धूर्त
फलस्य तंडुलधियानीत्वा पुनर्भुक्तवान् ॥ व्यावृत्तान्प्रचलन्नुत्स्खलत्परिपतन्मुह्यन्विघूर्णन्नहसन्नट्टाट्टध्वनिमुक्तमौलिकुसुमस्वर्वेश्यया हस्यते ॥ शोक
स्य परिपोषः करुणः ॥ आशाविच्छेदे सति सर्वेंद्रियक्षोभो वा करुणः ॥ न च विप्रलंभेतिव्याप्तिः ॥ तत्रेच्छाया आशायास्सत्वात ॥ तद्विच्छेदे तु स विप्रलंभः करुण
एव ॥ शोकोदुःखं वर्णोस्य कपोतचित्रितः ॥ दैवतं वरुणः स च स्वनिष्ठः परनिष्ठश्च ॥ स्वशापबंधनक्लेशानिष्टैर्विभावैः स्वनिष्ठः ॥ परेष्टनाशशापबंधनक्लेशादी
नां दर्शनश्रवणैर्विभावैः परनिष्ठः ॥ स्वनिष्ठो यथा ॥ तव नाथशरः शरासनं तव देहेन सहैव भस्मसात् ॥ अहमस्मि नतः प्रतीयते न तवनास्मीति किमुच्यतामितः ॥
परनिष्ठो यथा ॥ अनुवनमनुयांतं बाष्पपारिप्लुतं तं म्लदलिकमलदामक्षामभालोच्य रामं ॥ दिनमपि रविरोचिस्तापमंतः प्रसक्ते रगनिरिपि धत्ते नारकाबाष्प
बिंदून् ॥ परिपूर्णक्रोधो रौद्रः ॥ सर्वेन्द्रियाणामौद्धत्यं वा ॥ वर्णोस्य रक्तो दैवतं रुद्रः ॥ यथा ॥ चंडांशुः किमचक्रं भुजगपतिरसौ वर्तते बाणपाशः कुंताः किं दंति
दंताः न च गिरिशिखरीनिः किं नु शस्त्रैः किमन्यैः ॥ भीमोहं दुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडः प्रत्याक्रांतो कोपप्रलयकुतवहो नास्ति कस्यापि
वरयः ॥ यथा वा ॥ क्रीडेत्तुंगतुरंगटापपटलीखर्वीकृतो दीर्धरः श्रेणीस्फूर्जितधूलिधोरणिसमस्तोमावलीढं जगत् ॥ वध्यस्पर्धकरींद्रवृंदचरणाभ्या   राम०
भुग्नभोगीश्वरव्यग्रोद्यत्फणाग्ररलरुचिभिर्विद्योतयामो वयं ॥ परिपूर्ण उत्साहः सर्वेन्द्रियाणां प्रकर्षो वा वीरः ॥ वर्णोस्य गौरः ॥ दैवतं शक्रः ॥   १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स च त्रिधा ॥ युद्धवीरदानवीरदयावीरभेदात् ॥ इयांस्तु विशेषः ॥ सबोत्साहो युद्धवीरे प्रतापाध्यवसायादिप्रभवः ॥ दयावीरे आर्द्रतादिप्रभवः ॥ युद्धवीरो यथा ॥ संग्रामां
गणमागते दशमुखे सौमित्रिणा विस्मितं सुग्रीवेण विचिंतितं हनुमता व्यालोलमालोकितं ॥ श्रीरामेण परं तु पीनपुलकस्फूर्जत्कपोलश्रिया साट्टहासं नंदरसालसा
निरुद्धे शरे बाणासने दृष्टयः ॥ दानवीरो यथा ॥ अभ्यागच्छति मंदिरं द्विजकुले खंडाय खंडांबुधिं क्षाराब्धिं लवणाय दुग्धजलधिं दुग्धाय खेदास्यति ॥ दुर्वारो विरहे भ
वे हिति भियाद्दीनेन द्विव्यापगायस्यांघ्रिं न जहाति विप्रवपुषे रामाय तस्मै नमः ॥ दयावीरो यथा ॥ दयाबीजं हरेर्नेत्रमंकुरः स्तत्र भास्करः ॥ ततः समुत्थिवे तोपल्लु
वौ रामलक्ष्मणौ ॥ भयस्य परिपोषः सर्वेंद्रियाणां विक्षोभो वा भयानकः ॥ वर्णोस्य श्यामः ॥ दैवतं यमः ॥ स च स्वनिष्ठः परनिष्ठश्च ॥ अपराधात्स्वनिष्ठो यथा ॥ गो
पीक्षीरघटीविलुंठनविधिव्यापारवार्त्ताविदोः पित्रोरुत्थानशंकया शिशुवपुर्देवः प्रकाशयज्वरं ॥ रोमांचं स्वयन्दृशौ मुकुलयन्प्रत्संगमुत्कंपयन्नुसीत्कुर्वन्नूतमसिभस
र्पतिगृहं सायं समागच्छति ॥ परनिष्ठो यथा ॥ गंगायाः सलिले निमज्जति जटाजूटे परिभ्राम्यति ॥ अरपसक्षिहुताशने फणिफणाभोगे क्वचिल्लीयते ॥ कुंजीभूय हरस्य क
र्णसुषिरं निर्गंतुमुत्कंठते राहो रास्यगुहास्य किं भकुरुते बालस्तुषारद्युतिः ॥ चित्रलिखितं दासपरनिष्ठो यथा कुर्वाणे दशभिर्मुखे ईशमुखे नादं सुरैः कंपितं दिङ्नागै
श्चकितं हरेरपिहये रुत्पुच्छमाधावितं ॥ सुग्रीवस्तु समुच्छलज्जालधिया लोलवीचिभ्रमिभरपतत्सेलुविशंकया हनुमतो वक्त्रे दृशौ संदधे ॥ जुगुप्सायाः परिपोषो बीभत्सः
सर्वेंद्रियाणां संकोचो वा ॥ वर्णोस्य नीलो दैवतं महाकालः ॥ स च स्वनिष्ठपरनिष्ठश्चेति ॥ स्वनिष्ठो यथा ॥ कालीकुंडलिनी कुतूहलमिथः प्रारब्धयूथूत्कृति न्यंचद्धीर चि
लद्विहाय सिवलक्षिलीनिपातस्पृशी ॥ बध्यस्पर्धविपक्षपक्षरुधिरस्रोतस्विनीस्रोतसि भ्रश्यत्पुत्कृतिस्खलत्पथरणक्रोधाकुलो भार्गवः ॥ परनिष्ठो यथा ॥ छत्रं कुंभींद्र
कृणैर्विरचय तनु नं चामरं व्यालपुच्छैर्मालां मुंडैश्च चंडैः स्रजगजजघनैर्मंडपं योजयस्व ॥ भृंगैर्नीराजनायाः कलयविधिमिति प्रेतवधांगनामालापः कु

रसतरंगिणी०
१५

क १

दुलिन्यास्तनय परिणयारंभलज्जावभ्रम्य ॥ विस्मयस्य सम्यक्समृद्धिरद्भुतः ॥ सर्वेंद्रियाणां तटस्थ्यं वा ॥ वर्णोस्य पीतो दैवतं ब्रह्मा ॥ स च स्वनिष्ठपरनिष्ठश्च ॥
स्वनिष्ठो यथा ॥ लीलानिबद्धपाथोधिहेलाहतदशाननः ॥ स रामः सीतयाश्लिष्टो आत्मानं बहुमन्यत ॥ परनिष्ठो यथा ॥ एका जीर्णदुकूलवद्वसुमती बद्धांबुधि
विंदुवन्नु बाणाग्रे गजराजकपोलं रक्ष्याप्रहितो रावणः ॥ लंकाकापि विभीषणाय सहसा मुद्रेव हस्ते र्पिता ॥ श्रुत्वैवं रघुनंदनस्य चरितं को वा न रोमांचति ॥ अत्युक्ति
भ्रमोक्तिचित्रोक्तिविरोधाभासप्रभृतयो अद्भुता एव ॥ अत्युक्तिर्यथा ॥ भूयादेष सतां हिताय भगवान्क्रोडावतारो हरिः ॥ सिंधोः क्लेशमपायमस्य दशनप्रांते स्थि
तायाभुवः ॥ तारहारन्तिवारिदस्लिककलतिस्ववीहिनी माल्यति क्रीडादर्पणति क्षपापतिरुद्रैवश्चताटंकति ॥ यथावा ॥ दिव्यद्रूरे मुखकुहरे विस्तीर्णे पर्णति व्योम ॥ चूर्णति
चंद्रः क्रमकति कनकगिरिः खदिरसारथिः खांशुः ॥ भ्रमोक्तिर्यथा ॥ तीव्रे त्विग्मरुचः करे प्रतिविंबितां सेकुं कपोलस्थलीं नीराणां निकरं करेण हरता मूर्छीकृते वारिधौ ॥
मैनाकं समुदीक्ष्य पक्षपतितं शालककुशंकाजुषो हेरंबस्य पुनातु दंतशिखरव्यापारलीलारसः ॥ यथावा ॥ अंतः क्रोधाग्निजाग्रत्कपटनहरिस्फारनिश्वासवातव्याधूत
वारिवाहाः कुलधरणिभृतः सानुषु प्रस्खलंतः दिङ्नागैर्नागबुध्या वनहरिणकुलैः शंकया शाद्वलानां छायाक्रांत्या किरातैः सितिबसेन धिया वीक्षितास्वर्वधूभिः ॥
चित्रोक्तिर्यथा ॥ गिरर्वमणिमौक्तिकावलिमलिहृत्परस्थावरं शरतुहिनदीधितिव्यजनमारुतं वांछति ॥ धनुः स्वपिति मान्मथं शिथिलबंधमंधं तमो नमो मनसिजाय ते किमपि पः
कौतुकं तन्वते ॥ लाक्षणिकमखिलं चित्रोक्तिरेव ॥ विरोधाभासो यथा ॥ कोप्पसोनवमुकुंदनंदको नंदको भवति कंससंगरे ॥ कुंडलीत्वमसि कालियं कुलो दूरतोनय राम०
सितं निवेदय ॥ नात्येव च सर्वेर साउआनं दरूपाः ॥ अद्भुताख्याः ॥ परनिष्ठा एव ॥ चित्तवृत्तिर्द्विधा ॥ प्रवृत्तिनिवृत्तिश्च ॥ तत्र निवृत्तो यथा शांतरसस्त १५
याप्रवृत्तो मायारस इति प्रतिभाति ॥ एकत्र रसोत्पत्तिरपरत्र नेति यक्तुमशक्यत्वात् ॥ न च रस इति रेव ॥ तद्विसकस्यास्तु व्यभिचारी ॥ नभृंगारस्य ॥ तद्वैरिणो

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रापि

बीभत्सस्यापितत्रसत्वात् ॥ अतएवनबीभत्सस्यापिनहास्यस्य तद्वैरिणः करुणस्यापितत्रसत्वात् ॥ एअतएवनाद्भुतस्यापि नवीरस्य तद्वैरिणोभयानकस्यापितत्रस
त्वात् ॥ अतएवनभयानकस्यापि ॥ नापिशांतस्य तस्यतद्विरोधित्वात् ॥ नचसामान्यएवरसः ॥ तद्विशेषाद्दृतरेभवंतीतिवाच्यं ॥ शांतरसस्य नहिरसाभावत्वापत्तेः
किंतुविस्मृतएवरतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्पद्यंते ॥ निलीयंतेच ॥ तेनतत्रतेव्यभिचारिभावाइति ॥ लक्षणंचप्रबुद्धमिथ्याज्ञा
नवासनामायारसः मिथ्याज्ञानस्यस्थायीभावः विभावाः संसारिकभोगार्जकधर्माधर्मौ ॥ अनुभावाः पुत्रकलत्रविजयालास्याद्यः ॥ यथा ॥
वाटीलाटीदृगंभोरुहरभसकरीवापिकाकांतितल्पं चंद्रानुकूल्यं प्रकटयतिमिथः कामिनीकामनेति ॥ रूपंकामानुरूपंमणिमयभवनंबंधुरंबंधुरागालोकेलोकेश
कस्यत्यमसिनभुवनेसर्वदासर्वदाता ॥ नाप्यभिन्नेपरं निर्वेदः स्थायीभावकः ॥ शांतोपिनवमोरसोभवतीति । निर्वेदस्यपरिपोषः शांतोरसः ॥ दोषप्रशमोवा ॥ दो
षाः कामक्रोधादयः ॥ अस्यविषयदोषविचार विरक्त्यादयोविभावाः ॥ अनुभावाः ॥ आनंदाश्रुपुलकदर्पगद्गदवचनादयः ॥ यथा हेयंहर्म्यमिदंनिकुञ्ज
भवनंश्रेयंप्रदेयंधनं बेयंतीर्थपयोहरेर्भगवतोगेयंपदांभोरुहं ॥ नेयंजन्मचिरायदर्भशयनेधर्मेनिधेयंमनः स्तेयंतत्रसितासितस्यसविधेध्येयंपुराणं
महः ॥ यथावा ॥ वेदस्याध्ययनंकृतंपरिचितंशास्त्रंपुराणंश्रुतंसर्वंव्यर्थमिदंपदंनकमलाकांतस्यचेत्कीर्तितं ॥ उत्खातंसदृशीकृतेविरचितः सेतोर्भसा
भूयसासर्वंनिष्फलमालवालवलयेसिक्तंनबीजंयदि ॥ इतिश्रीभानुदत्तमिश्रविरचितायांरसतरंगिण्यांरसनिरूपणंनामसप्तमस्तरंगः ॥ ७ ॥ ६९
स्थायिभावजादृष्टिरष्टधा ॥ स्निग्धाहृष्टादीनाक्रुद्धादृप्ताभीताजुगुप्सिताविस्मिताचेति ॥ व्यभिचारिभावजादृष्टिर्विंशतिधा ॥ शून्यामलिन्याश्रांता
लज्जितारंकितामुकुलितार्धमुकुलाग्लानाजिह्माकुंचिताविलर्किताभिततप्ताविषण्णाललिताकेकराविकोशाविभ्रांताविप्लुताअस्तामदिराचेति ॥ सरभेदा

दृष्टधारसदृष्टिः ॥ कांताहास्याकरुणारौद्रावीराभयानकाबीभत्साद्भुताचेति ॥ षट्त्रिंशद्दृष्टयः ॥ कूणिताविकसितार्धविकसिताचकितासुप्ताघूर्णितालसा
विवर्तितार्धविवर्तितापर्यस्ताभ्रान्ता स्तिमिताचेत्यादयोदृष्टिभेदाऊहनीयाः ॥ तत्रललितायथा ॥ मनसिजनृपतिर्वामंडनंवामहोवाशिशुरिवभुवनंवा
यौवनंथायथावा ॥ अखिलमपिकृतार्थं वीचिविसेपरेकेलक्रमलविजयलीलाशोभिनालोचनेन ॥ ग्लानायथा ॥ पर्यस्तालकरोचिषः श्रमजुषः प्रस्यंदखंड
त्विषः श्रीभौमीतलशीकरेनशशिनावातंसमातन्वति ॥ जीयास्तामचलाधिराजदुहितुर्निष्यंदनीलोत्पलच्छायानिर्झितचंचरीकमिथुनस्पर्धासमर्द्धेदृशौ ॥
एवमन्योऽप्युदाहरणीयाः ॥ अथरसानांजन्यजनकभावः ॥ तत्रभरतः ॥ शृंगाराद्भवेद्धास्यो रौद्राच्चकरुणोमतः ॥ वीराच्चाद्भुतोत्पत्तिर्बीभत्साच्चभयानकः ॥
अयमुत्सर्गः ॥ परेषामपिरसानांकार्यकारणभावदर्शनात् ॥ पूर्वग्रंथकारसंमतिरपि ॥ कथासंगृह्योगाच्चविवक्षावशतः कवेः अन्योन्यजन्यजनकं रसभावाभवं
त्यमी ॥ यथा ॥ मातुर्दृष्ट्वाघंभोरुयुगलगलच्छाप्यधारसुधारां जातस्पर्धेक्ष्यवक्षः स्थलरुधिरचयं कुप्यताभार्गवेण ॥ हस्तन्यस्तः सहस्रार्जुनरमनस्मारभंगगंभीर
वीर्यः स्फूर्जद्दोर्वल्लिहल्लीसकसकलकलास्तत्रधारः कुठारः ॥ अत्रवीरंप्रतिकरुणबीभत्सयोः कारणता ॥ यथावानातचरणानां ॥ कुरंगाक्ष्यावेणीसुभग वि
परीतेरतिविधावधिस्कंधंदृष्ट्वाक्रमपिनिपतंतीमरिभटः ॥ अधिग्रीवंबध्नत्प्रचलकरवालव्यतिकरंस्मरन्नेवत्तस्थौविरमतिपरीरंभणरसात् ॥ अत्रभयानकं
प्रतिशृंगारस्यकारणता ॥ यथावा ॥ क्षुधिकुपितकृतांतस्यंदनस्पर्धिनादंशिशिशिशिदृशाकंठस्तकवान्चारिहास्त्रं ॥ नडितिजनकपुत्र्याः साम्यमालोक्यमानस्सज
तिनपवनास्त्रंराघवः स्विन्नपाणिः ॥ अत्रशृंगारंप्रतिवीरस्यकारणता ॥ एतेषामांगांगीभावापन्नानांरससंकरइतिनामलोकाजल्पंति ॥ रसानांमिथोविरोधोपि ॥
तत्रभरतः ॥ शृंगारबीभत्सरसौतथावीरभयानकौ ॥ रौद्राद्भुतौतथाहास्यकरुणौवैरिणौमिथः ॥ वैरिरसस्यवैरिरसेइवविभावानुभावव्यभिचारिभावाअपि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसहानिकराइतितानपिवारयेत्॥ तत्रप्राचीनसंमतिः॥ नचवैरिरसंभूयादिरिलोनविभावकं॥ नानुभावंनसंचारिभावंचापिकदाचनेति॥ किंत्वंगांगिभावाना
पन्नयोरेकदेशेसतिवैरं देशभेदेसतिनवैरं यथैकपिसंयोगतदभावयोरिवसमयभेदेसत्यपिनवैरं॥ भूतलेघटतदभावयोरिव॥ वैरंयथा॥ प्रियेणालिंग्यमा
नायाः प्रियायाः कुचकुंभयोः॥ करजक्षतनिर्मुक्तंरुधिरंकुंकुमायते॥ देशभेदेसतिविरोधाभावोयथा॥ एकः सिंधुभुवः करेविलुलितः चक्रेद्वितीयः स्थि
तः कामध्वंसिनिकालकूटकवलक्लिष्टेत्ततीयोधृतः॥ भूयः क्षीरनिधेर्मनप्रथमनेसस्फुरश्चतुर्थस्तथापायासुः कमलापतेर्भगवतोनानारसाः पाणयः॥
अत्रशृंगाररौद्रकरुणाद्भुतरसानां विरोधाभावः॥ समयभेदेसतिविरोधाभावोयथा॥ भग्नंकामरिपोर्धनुः परिहृतंराज्यंस्थितंकानने निर्भिन्नः त्रिशिरास्वरस्य
पिशितंस्पृष्टंकपिर्लालितः॥ लंकेशोदलितः श्रियायरुदितंलंकावधूनांश्रुतंनीलासमविदिरुभूस्तदखिलंरामस्यलोकोत्तरं॥ अत्राद्भुतशांतभयानकरौद्रवी
भत्सहास्यवीरकरुणशृंगाराणांविरोधाभावः॥ अगांगीभावापन्नानांरसानांविनिवेशोयत्रसरसःशबलइतिवेदितव्यं॥ तस्याप्येतदेवोदाहरणं॥ अजयोर्वैरेपि
नरसहानिः॥ भट्योर्वैरिभयोरिव॥ यथा॥ सीतांसंस्मृत्य वीचिप्रचलकुवलयस्पर्धिचक्षुःक्षिपंती सेनांसंवीक्ष्यरक्षःशरदलितवपुःशोणितासारसिक्तां॥
रामेणक्रोधदृप्यद्दशमुखनिपतन्मुंडलाभभ्रमोद्यत्क्रीडत्कालीकरालभ्रुकुटिसहचरीरंदधेचापयष्टिः॥ अत्रशृंगारवीभत्सयोर्विरोधेपिनरसहानिः॥ एव
मंगांगिभावापन्नयोर्विरोधिनोरेकत्रभावेपिनरसहानिः॥ यथा॥ भोजंगमंगिरिमयंजलदात्मकंवाशस्त्रंयदेवमुमुचेदशकंधरेण॥ सर्वंविरहतनयाविरहा
कुलेनरामेणयद्धिमयशल्यमिवव्यलोकि॥ ननुवीभत्सशृंगारयोः सहजंवैरं कुतः मधुनिपीयनिष्ठीवतोःसंभोगदर्शनादिति चेत्सत्यं॥ वीभत्सस्याजुगुप्सारू

पिभावः॥ साचतद्दर्शनेनतदस्पृश्यभवति॥ ननुतयोरागोत्कंठ्यादिति॥ ननुतथापिबीभत्सेशृंगारोदयपते॥ तथाहि॥ यदपिहृदिविशालामुंडमालांनपाणिस्त्रजाति
नरकपालंरौरवंचर्मचैलंतदपिगिरिसुतायाः पक्षपातःपुरारौसमुदयतिपिचित्रंकामिनोःप्रेमबंधः॥ इतिचेत्सत्यं॥ निजभर्तुरधमेपिभूषणेशत्कृत्यतिशयेन
प्रत्यासत्त्याजुगुप्सैवनाचतरति॥ जुगुप्सितत्वेनप्रतीयमानमेव॥ हिजुगुप्सोत्पादकंभवति॥ किंचेंद्रियसंबंधोपाधिकंमत्रप्रेमैवोत्पद्यते॥ तस्मात्स्वच्छाविभावाभा
वाद्बीभत्सस्तत्रनजायतइति॥ ननुवीरस्यतुधिगछलःसर्पस्पर्शचकितनारोद्भवःकस्मिकोत्पातातिपातेविस्मयरतिःचेत्सत्यं॥ चकितताविस्मयश्चतत्ररसावेशात्र
भवत्येव॥ सतिवाविषयभेदः॥ वीरस्यनप्रतिभटाद्भयंकिंतुभुजंगमाद्भीर्चाःनप्रतिबलबलाधिक्येविस्मयः॥ किंतुलौल्यात्तेरसवैरस्योत्पादकमखिलमवधेयं॥
तत्रपूर्वाचार्याः॥ अन्यच्चरसवैरस्योत्पादकंवचनं॥ तथा॥ नवान्यंरसभावज्ञैर्नाट्यशास्त्रविशारदैः॥ वचनमित्युपलक्षणं॥ एवंविभावानुभावेष्वपिद्रष्टव्यं॥ यथा
काहंक्वत्वंक्वमधुसमयः कुत्रवाद्भूतिकासौमेघछायाप्रतिबलमिदंप्रेमवाकुत्रयूनोः॥ आयुर्वायुप्रचलनलिनीवारिबिंदूपमानंमानंमुग्धेविसृजसिकलंतुच्छमेवंप्रभू
तीमः॥ अत्रनिर्वेदप्रतिपादकमखिलंतत्रशृंगारविरोधि॥ अनौचित्यंचरसस्यथाभवधेयं॥ तत्रप्राचीनग्रंथकृतः॥ अनौचित्यादृतेनान्यद्रसभंगस्यकारणं॥ प्रसिद्धौ
चित्यबंधस्तुरसस्योपनिषत्परा॥ इत्युद्वेगकरमनौचित्यं॥ तस्माद्द्वयोर्यूनोर्यत्रमिथोरतिस्तत्रैवरसः॥ एकस्यरतिश्चेद्रसाभासएव॥ एकस्यारसश्चेद्रसाभासएव॥
यथा॥ सीतासमागमश्लाघावंधुरंदशकंधरं॥ प्रहर्तुंक्षमतेकामोरामोवानिशितैःशरैः॥ अत्ररावणस्यैवरतिर्नतुसीतायाः॥ निधुवनवचनभ्रांतेयातंचलैर्नयनांचलैः
क्लिमितिवलितग्रीवंमुग्धेमुहुर्मुहुरीक्षसे॥ विफलमखिलंयूनोर्नोचेद्धुरेतिपरस्परं रतिरथमनोजन्मादेवःसएवनिषेव्यतां॥ अत्रनायिकायाएवरतिर्नतुनायकस्य॥
एवमेकस्यानेकविषयारतीरसाभासएव॥ बरंलेशएवविशेषः॥ यस्यस्यवस्त्रिताबाल्योनायिकाभवंतितत्रनरसाभासः॥ तथासतितिलक्षणस्यसकललोकनायक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य बहुकामिनी विषयायारतेराभासत्वापत्तेः ॥ तस्मादव्यवस्थितबहुकामिनीकवैशिकनायकपरमेतत् ॥ अतएव वैशिकानां वेश्यानां च रसाभास इति प्राची
नानां मतं ॥ एकस्या अनेकविषयारतिर्यथा ॥ संपकस्या ध्रुता राभवति तरलिता यत्सुरो नेत्रतारा हस्ते कणोद्य कांचीयदभिमुखगता वेपते रत्नकांची ॥ उग्रः क
स्माद्यतुष्टः सरविपदसुगमे कश्चिदुग्रो भिपातः स्नातं केनाद्यवेणीपयसि विलुलिता यत्कृते कापि वेणी ॥ अत्र किमो बाहुल्ये नवेश्यात्वं ॥ एकस्यानेकविषयार
तिर्यथा ॥ पंचेषुक्षितिपप्रतापलहरीश्रीतिल्लरीयापुनः कासां न स्तनकांचनाचलतटे काश्मीरपंकायते ॥ कासां मूर्धनि नैवपंकजदृशां सिंदूरलेखायते कासां
वा न च कर्णयोः प्रियसखे माणिक्यभूषायते ॥ अत्रापि वैशिकता प्राग्वदेव ॥ यत्र रसा बहवः स रसशबलः ॥ यत्र भावा बहवः स भावशबलः ॥ अत्र रसशबलो दृशि
तः ॥ भावशबलो यथा ॥ प्रयत्ने यदसुभं मम श्रुतिपथं जायेत तस्यावकः ॥ श्वश्रा गेमम कः स्मरस्त्रिजगतीभूत्य विनाराधया ॥ निर्मुक्ते वमनस्यपाम्नगद्घोलाव
ल्यमन्या दृशोधिग्जन्म ध्रुगतासि किं विलपितैः का सिप्रसन्नाभव ॥ निर्वेदोत्सुक्यामर्षश्रममतिस्मृतिविषादैन्यानां भावानां सांकर्यादेष भावशबल इति ॥
अथ रसभावालंकाराणामभिव्यक्तिः ॥ रसस्त्रिविधोभिमुखो विमुखः परमुखश्चेति ॥ व्यक्तैर्भावविभावानुभावैः यस्याभिव्यक्तिः सोभिमुखः ॥ भावविभा
वानुभावानामनुक्तत्वात्कष्टावगमो विमुखः ॥ परमुखोपि द्विविधः ॥ अलंकारमुखो भावमुखश्चेति ॥ अलंकामुखे लंकारो मुख्यो मनो विश्रामहेतुत्वा
त् ॥ रसो गोणः ॥ भावमुखे भावो मुख्यो मनो विश्रामहेतुत्वात् ॥ रसो गोणः ॥ अत्र प्राचीनसंमतिः ॥ अलंकारे च रुचिरे मनो विश्रांतिकारिणि ॥ अलंकारस्य
मुख्यत्वं गोणत्वं रसभावयोः ॥ अभिमुखाश्च स्वस्वप्रकरणे उदाहृताः ॥ विमुखो यथा ॥ मैथिली लक्ष्मणो रामः सुग्रीवः पवनात्मजः ॥ लंकापुरं परित्य

रसतरंगीणी
१९

मु
ज्य पारंवारिनिधेर्ययुः ॥ अत्र संकटमखिलं संतीर्यैते समागता इत्यद्भुतो रसः ॥ कष्टादवगम्यते ॥ अलंकारमुखो यथा ॥ एषानलेरवाभ्रमता मलीनां भाति
प्रभाते नवकैरविण्याः ॥ आलिंगितः किंतु तुषारभानोः कांतिः कलंकस्य वपुर्विलग्ना ॥ अत्रापह्नुतेरलंकारस्य मुख्यता ॥ भावमुखो यथा ॥ सप्तांभोनिधिनीर
हीरपटलालंकारिणीं मेदिनीं दातुं विप्रकुलाय योजितवतः संकल्पवाक्योद्यमं ॥ नाभीनीररुहासैरोरुहभुवा तत्कालमाविष्कृते हस्तांभोरुहि भार्गवस्यकिमपि
व्रीडास्मितं पातु वः ॥ अत्राद्भुतभावस्य मुख्यता ॥ दानवीररसो गोणः ॥ विद्वद्वारिधराः स्नेहं तथा वर्षंतु संततं ॥ लभते विपुलां वृद्धिं यथा रसतरंगिणी ॥ अथ
गाढ्स्व वाग्देवि हियां रसतरंगिणीं ॥ अस्मत्सद्येन पद्मे नरचयश्रुतिभूषणं ॥ २ ॥ यावद्भानोः सुताकापि कालिंदीभुवि वर्तते ॥ तावत्तिष्ठतु मे भानो रेषार
सतरंगिणी ॥ ३ ॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां रसाभासनिरूपणं नामाष्टमस्तरंगः ॥ समाप्तेयं रसतरंगिणी ॥ ॥ श्रीरस्तु
॥ इमां तरंगिणीं ज्ञात्वा यः करोति परिश्रमं ॥ तस्य प्रौढतरा बुद्धिः काव्ये सर्वत्र जायते ॥

रंग
१९

KKSU LIBRARY RAMTEK 441 106 M-187 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:11
,TRANSFERRED=2020/10/23 at 15:14:19
,PAGES=18
,TYPE=STD
,NAME=S0004492
,Book Name=M-1871-RASTARDINI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection